8279. *Mālatī-mādhava-prākṛta-vivaraṇam.*

By Dviveda Rāmū.

Substance, country-made paper. 5 × 2¾ inches. Folia, 4–22, of which 5, 13 are missing. Lines, 13 on a page. Extent in ślokas, 550. Character, Nāgara of the eighteenth century. Appearance, discoloured.

Colophon :—

इति मालतीमाधव-प्राकृतविवरणे द्विवेदरामूकृते दशमोऽङ्कः ।

Post Colophon :—

समाप्तमिदं विवरणं ।

श्रीबालकृष्णादिमनोविनोदकृते यदेतद्विहितं मयापि ।

रामूद्विवेदस्य ततः क्षमन्तां सन्तः प्रमादादपराधमत्र ॥

5302.

MURĀRI.

5607. अनर्घराघवः । *Anargha-rāghava.*

Substance, palm-leaf. 15 × 1½ inches. Folia, 102. Lines, 3, 4 on a page. Character, Uḍiyā, about 100 years old. Appearance, good. Complete.

Last Colophon :—

नायकानन्दो नाम सप्तमोऽङ्कः ।

अनर्घराघवनाटकं समाप्तम् ।

Post Colophon :—

गोविन्दमहापात्रवरेण लिखितमिदं पुस्तकम् । ज्येष्ठमास-मलमासरे कृष्णपक्षरे पञ्चमीदिन ।

Well-known, often noticed and printed.

5303.

3192. *Anargha-rāghava.*

Substance, country-made paper. 11 × 4½ inches. Folia, 70. Lines, 9 on a page. Character, Nāgara. Date, Saṃvat 1778. Appearance, discoloured, mouse-eaten and worn-out. Complete.

The Post Colophon Statement :—

संवत् १७७८ मिति श्रावणकृष्णतृतीयायां सनिवासरे ।

5304.

1367. *A commentary on Murāri-nāṭaka or Anargha-rāghava.*

By Rucipati.

Substance, country-made paper. 11 × 4¾ inches. Folia, 225. Lines, 9 on a page. Character, Nāgara. Appearance, fresh. Incomplete at the end.

The commentator Rucipati wrote under the patronage of Bhairavendra-deva of Mithilā about the end of the 15th

century. Both the text and the present commentary have been printed in the Kāvyamālā Series, 1887.

The manuscript comes up to page 360 of the printed edition, line 7.

5305.

4032. *A commentary on Anargha-rāghava, entitled Tātparya-dīpikā by Viṣṇu Paṇḍita, son of Raṅga Bhaṭṭa.*

Substance, country-made paper. 14 × 3¼ inches. Folia, 103. Lines, 8 on a page. Extent in ślokas, 3200. Character, Bengali of the early eighteenth century. Appearance, old and discoloured. Complete.

Last Colophon :—

इति श्रीमहामहोपाध्याय-परममीमांसक-श्रीरङ्गभट्टतनूज-श्रीविष्णुपण्डितकृतायां तात्पर्य्यदीपिकायां सप्तमोऽङ्कः समाप्तः। समाप्ता चेयमनर्घराघवाभिधाननाटिकेति।

Beginning :—

ॐ नमो विघ्नेश्वराय।

अनणीयांसमीशानं नत्वोपास्य पुराभिदः।
अनर्घराघवग्रन्थीन् उद्ग्रथ्नामि यथामति॥

It ends :—

यस्य श्रीरङ्गभट्टोऽभूज्जनकोऽभूद्बृहस्पतिः।
सवित्री यस्य सावित्री सावित्रीव पतिव्रता॥
तेनेयं निर्म्मिता विष्णुपण्डितेनातिसुन्दरी।
टीका + + + यातां विबुधा हृदि यत्नतः॥
विबुधा मथ्यमानान्मे निबन्धादम्बुधेरिव।
हित्वा विषमिवान्याय्यं संगृह्णीध्वं गुणामृतम्॥
धीरा मुरारिपदवर्णनकौतुकेन
यत्किञ्चिदप्यनुचितं + + +।
शोध्यं तद + + हृदयैः सदयैर्भवद्भिः
केषामशेषवचने स्खलनं न वा स्यात्॥

टीकाः पुराणकृतिनां यदपीह सन्ति
धीरास्तथापि मम वाचि रसोऽस्ति कोऽपि ।
वासन्तिका न लतिका + + +
+ + + परिमलः पुनरन्य एव ॥

5306.

5578. *Pañcikā, a commentary on Anargha-rāghava.*

By Viṣṇu, son of Mukti-nātha.

Substance, palm-leaf. 12 × 1½ inches. Folia, 147. Lines, 5 on a page. Extent in ślokas, 3300. Character, Uḍiyā of the eighteenth century. Appearance, fresh. Complete.

The commentary begins thus .—

श्रीदुर्गायै नमः ।

यं ध्यात्वा वरदं धीरा दुष्करेष्वपि कर्म्मसु ।
अनायासाः प्रवर्त्तन्ते तं वन्दे द्विरदाननम् ॥
अनर्घराघवाख्यस्य नाटकस्य यथामति ।
करोमि पञ्चिकां विष्णुर्मुक्तिनाथार्य्यनन्दनः ॥
मया मन्देन रचिता पञ्चिकेयं मनीषिभिः ।
उक्तानुक्तदुरुक्तत्वं प्रयत्नेन विमृश्यताम् ॥

नाटकत्वञ्चास्य ख्यातेतिवृत्ततया धीरोदात्तमानुषनायकत्वेन वीररसप्राधान्यात् सन्धिपञ्चकतदङ्गसन्ध्यन्तरांगभूषणापताकास्थानविष्कम्भादियुक्तत्वात् । etc. etc.

Last Colophon :—

इत्यनर्घराघवपञ्चिकायां सप्ताङ्कविवरणम् । समाप्तश्चायं ग्रन्थः ।

5307.

HANUMĀN.

4664. महानाटकम् । *Mahā-nāṭakam.*

Revised by Madhu-sūdana Miśra.

Substance, country-made yellow paper. 16 × 3¾ inches. Folia, 56. Lines, 7 on a page. Character, Bengali in a very modern hand. Appearance, fresh. Complete.

End :—

एष श्रील-हनूमता विरचिते श्रीमन्महानाटके
वीर-श्रीयुतरामचन्द्रचरिते प्रत्युद्धृते विक्रमैः ।
मिश्र-श्रीमधुसूदनेन कविना सोन्दर्य्यसज्जीकृते
स्वर्गारोहणनामकोऽत्र नवमो जातोऽङ्क एवेत्यसौ ॥
समाप्तोऽयं ग्रन्थः ।

This MS. is complete in nine acts.

5308.

3199. *Mahā-nāṭakam.*

Substance, country-made paper. 11 × 6 inches. Folia, 72. Lines, 9 on a page. Character, Nāgara of the eighteenth century. Appearance, discoloured. Complete.

Post Colophon :—

इदं पुस्तकं महादेवभट्टतिलकेन लिखितम् । श्रीशुभं भवतु ॥
माघमासे कृष्णपक्षे त्रयोदश्यां तिथौ रविवासरे इदं पुस्तकं समाप्तम् ।

5310.

10788. *Mahā-nāṭakam.*

Substance, country-made paper. 16 × 4 inches. Folia, 68. Lines, 6 on a page. Character, Bengali of the nineteenth century. Appearance, fresh. Incomplete at the end.

58B. इच श्रील-हनूमता विरचिते श्रीमन्महानाटके
वीर श्रीयुतरामचन्द्रचरिते प्रत्युद्धृते विक्रमैः ।
मिश्र-श्रीमधुसूदनेन कविना सन्दर्भसज्जीकृते
युद्धोपक्रमणाभिधोऽत्र गतवानङ्को महान् सप्तमः ॥

The MS. ends abruptly in the 8th act.

5311.

1137. *Hanūman-nāṭake Aṅgada-pratāpa-vārṇanam.*

Substance, country-made paper. 9 × 4½ inches. Folia, 5. Lines, 9 on a page. Extent in ślokas, 90. Character, Nāgara. Appearance, fresh. A fragment.

One chapter of Mahā-nāṭaka.

Post Colophon :—

साबा (?) संवत् १८ ।

5312.

10936. *Mahā-nāṭakam.*

Revised by Damōdara Miśra.

With a commentary by Mohana Miśra.

Substance, country-made paper. 12 × 5 inches. Folia, 102. In tri-pāṭha form. Character, modern Nāgara. Date, Saṃvat 1857. (It seems to be the date of the original MS.). Appearance, fresh. Complete.

An account of the reviser :—

102, रचितमनिलपुत्त्रेणाथ वाल्मीकिनाब्धौ
निहितममृतबुद्ध्या प्राङ्महानाटकं यत् ।

सुमतिन्टपति-भोजेनोद्धृतं तत् क्रमेण
ग्रथितमवतु विश्वं मिश्र-दामोदरेण ॥ ८९ ॥

Last Colophon of the MS. :—

इति श्रीहनुमद्-विरचिते महानाटके रामविजयो नाम चतुर्दशोऽङ्कः ॥ १४ ॥

Last Colophon of the commentary :—

इति श्रीमिश्रमोहन-दासविरचितायां हनुमन्नाटकदीपिकायां रामविजयो नाम चतुर्दशोऽङ्कः ।

Post Colophon :—

१४ ॥ शुभं भवतु संवत् १८५७, समैनाम आसावदी ४ वार बुधवार ।

The beginning of the commentary :—

श्रीरामाय नमः ।

हृदये यत्प्रेरणया समुद्यतोऽहं विमूढतरबुद्धिः ।
तत्पदकमलं गोकुलनाथस्य वेदादेः ॥ १ ॥
हनुमन्नाटकसागरशब्दार्थागाधतां सुगाधत्वं नेतुं ।
कृतसाहसतां मम सुधियः क्षन्तुमर्हन्ति ॥

The commentary ends :—

माथरकुलसम्भूतिः शुद्धचतुर्वेदविधौ विख्यातः ।
हेमौरसो विजयते कमलापतिरीश्वरप्रेमा ॥
तत्पुत्रेण मयेयं मोहननाम्नार्थरत्नानां मञ्जूषा ।
कपिविहिताप्यभिधानशालेन संवृता ॥
एतद्ग्रन्थार्थोक्तिश्रमैकविज्ञः पतिः श्रियो रामः ।
तुष्टो निजपदभक्तिं दिशतु दयावान्‌कृतकरः स्वल्पं ॥

5313.

4523. *A commentary on Mahā-nāṭaka.*

By Candra-śekhara Vidyālaṅkāra.

Substance, country-made paper. 16 × 5¼ inches. Folia, 58. Lines, 11 on a page. Extent in ślokas, 2320. Character, Bengali. Date, Saka 1730. Appearance, fresh. Complete.

Last Colophon :—

इति श्रीचन्द्रशेखरविद्यालङ्कारकृतायां श्रीमन्महानाटक-टीकायां दशमाङ्कविवरणम् ।

Post Colophon :—

शाके शून्यानलमुनिक्ष्मामितेऽब्दे तु साहसे ।
पञ्चविंशेऽह्नि टीकेयं समाप्ता लक्षणाक्षरा ॥

See I.O. Catal. No. 4150.

5314.

BHAṬṬA NĀRĀYAṆA.

9050. **वेणीसंहारः ।** *Veṇī-saṃhāraḥ.*

Substance, country-made paper. 10½ × 3¼ inches. Folia, 90. Lines, 6 on a page. Character, Nāgara of the eighteenth century. Appearance, old and worn-out. Complete.

Complete in 90 leaves Often printed.

5315.

ĀRYA KṢEMĪŚVARA.

3824. **चण्डकौशिकः ।** *Caṇḍa kouśikaḥ.*

Substance, palm-leaf. 12 × 2 inches. Folia, 39. Leaves are marked with letter numerals. Character, Newari. Date, N.S. 370=A.D. 1250. Appearance, old and worn-out. Complete.

Colophon :—

पञ्चमोऽङ्कः समाप्तः ।

Post Colophon :—

खाब्धिलोके गते वर्षे चैत्रे पञ्चदशे दिने ।
भृगौ च श्रीमतो राज्येऽर्भमल्लस्यास्य लेखनम् ॥
शुभमस्तु ।

Then in a later hand :—

चन्द्रेषुसागरे वर्षे नैपाले शनिवासरे ।
पौषेन्दुवृद्धिसप्तम्यां शुद्धं श्रीरामदासतः ॥

Rāmadāsa was the father of Dharma-gupta, the author of several dramatic works, at the end of the fourteenth century A.D. The family of Rāmadāsa held a very high position in Nepal in the latter half of the fourteenth century.

Caṇḍa-kauśika was composed at the court of Mahīpāla-deva by Āryya Kṣemīśvara. Mahīpāla is said to have driven away the Karṇāṭakas, that is, either the invading army of Rājendra-cola in the year 1023, or the Karṇāṭakas who came in the train of the Cedī Emperors later on.

See J.A.S.B., 1893, pp. 250 to 252.

5316.

8065. *Caṇḍa-kauśikaḥ.*

Substance, palm-leaf. $12\frac{1}{2} \times 1\frac{1}{2}$ inches. Folia, 55. Lines 4 on a page. Character, Newari. Date, N.S. 507 = A.D. 1387. Appearance, old and worn-out. Fol. 54 has lost its right half. Complete.

Last Colophon :—

पञ्चमाङ्कः समाप्तः ।

Post Colophon :—

श्रेयोऽस्तु संवत् ५०७ मार्गशिर शुक्लद्वितीयायां तिथौ शनिश्चर-
वासरे विजयराज्ये श्रीजयस्थितिराजमल्लदेवस्य ।

कीर्त्तिप्रतापार्ज्जितसिंहमूर्त्तिः

समार्ज्जितम्पादनखोपि यस्या ।

सेयं विभाति विबुधा जनानाम् ।

श्रीयाभवन्स्मरणः सिंहमल्लः (?) ॥

लिखितमिदम्भट्टाचार्य्य अमर + + + शुभमस्तु सर्व्वजगतां ॥

5317.

6508. *Caṇḍa-kouśikaḥ.*

Substance, country-made paper. 10×4 inches. Folia, 18. Lines, 13 on a page. Character, Nāgara of the eighteenth century. Appearance, old and discoloured. Very nearly complete.

5318.

KṚṢṆA MIŚRA.

6580. **प्रबोधचन्द्रोदयनाटकम् ।**

Prabodha-candrodaya-nāṭakam.

Substance, country-made paper. 18½×3½ inches. Folia, 43. Lines, 5 on a page. Character, Bengali. Date, Śaka 1665. Appearance, discoloured. Complete.

Last Colophon:—

प्रबोधचन्द्रोदयनाटके जीवन्मुक्तिर्नाम षष्ठोङ्कः समाप्तः ॥ समाप्तश्चायं ग्रन्थः ॥

Post Colophon:—

लब्धापायससंभ्रमाः पतिमुखप्रलेषैकतानानना

हारामुक्तकुचस्थली ललिततश्रेयोभिरालिङ्गिताः ।

मुग्धाः संस्थितमेत्य तास्तु पुरतः श्रेयांसमालापिताः

श्रीमद्गोपालसिंहवैरिवनिताः क्रन्दन्ति नन्दन्ति च ॥ ० ॥

श्रीगौरचरणदेवशर्म्मणो लिपिरियं पुस्तकञ्च ॥ शकाब्दाः १६६५ ।

श्रीराधाकृष्णाभ्यां नमः ॥

In a later hand on the lower margin :—

इदं पुस्तकं एकदीपनिवासिने आनन्दरामाय विद्यालङ्कारेण विक्रीतं। तेन रसामृतसिन्धुं नीत्वा मह्यं दत्तं।

The MS. is full of marginal notes and seems to have been carefully studied.

5319.

4686. *Prabodha-candrodaya.*

Substance, country-made paper, 15½ × 3½ inches. Folia, 39. Lines, 6 on a page. Character, Bengali of the early nineteenth century. Appearance, discoloured. Complete.

Colophon :—

इति कृष्णमिश्रविरचितं प्रबोधचन्द्रोदयनामनाटकं समाप्तम्।

श्रीरस्तु मयि लेखके। शुभमस्तु। समाप्तश्चायं ग्रन्थः।

5320.

4522. *Prabodha-candrodaya.*

Substance, country-made paper. 16 × 3½ inches. Folia, 70. Character, Bengali of the nineteenth century. Appearance, fresh. Complete.

There is also a short anonymous commentary, called Vivaraṇa.

It begins thus :—

नित्यविज्ञानमानन्दं ब्रह्म इत्यादिश्रुत्या ज्ञानानन्दस्वरूपश्चेति वेदान्तसिद्धान्तः। तादृशब्रह्मणश्च अविद्यादशायामसाक्षात्कारात् त्रैलोक्यं द्वैतं भासते। अविद्यानाशे तु अद्वैतं भासते, नहि वह्निः पदार्थान्तरमिति सिद्धान्तः। तदनुसारेण श्लोकस्यार्थो बोध्यः।

The commentary comes up to the middle of the 6th Act. 61B. Col. of the fifth :—

61B, इति पञ्चमाङ्कविवरणम्।

5321.

5031. *Prabodha-candrodaya.*

Substance, country-made paper. 17 × 3 inches. Folia, 43. Lines, 5 on a page. Character, Bengali of the eighteenth century. Appearance, old and discoloured. Complete.

5322.

4540. *Prabodha-candrodaya.*

A copy of Bhavānī-charaṇa Banerjee's printed edition of the Prabodha-candrodaya along with Maheśvara Nyāyālaṅkāra's commentary.

5323.

5278. *Prabodha-candrodaya.*

Substance, country-made paper. 16 × 4 inches. Folia, 33. Lines, 7 on a page. Character, Bengali. Appearance, discoloured. Complete. Date, Śaka 1641.

Colophon :—

समाप्तोऽयं महामहोपाध्यायश्रीकृष्णमिश्रविरचितः प्रबोध-
चन्द्रोदयो ग्रन्थः ।

Post Colophon Statement :—

श्रीमन्नन्दकिशोरचन्द्रचरणावाधाय साधारण-
प्रेमप्रोन्मिषदङ्गतान्धतमसाक्रान्ते मनस्यक्रमात् ।
श्रीमन्नन्दकिशोरनाममनुजो निर्णीय विश्वं पुनः
श्लिष्टं स्पष्टविशिष्टवाग्भिरनिशं बोधोदयं वाञ्छति ॥

१ ४ ६ १
शशभृदुदधिषड्जैवाहकेऽलेखि शाके
किमपि सुकृतिकाव्यं केनचिद्भूसुरेण ।
कुसुमशरशरालीसंख्यया संख्यातानि
कतिचिदपि दिनानि प्रायशः प्रत्यहं वै ॥

त्रमध्वमिह यः प्रमात्वयि बुधाः क्रुधा किं फलम्
विपर्ययलिपिभालके यदि ममैव दोषः कियान् ।
न चेन्मनसि चिन्तया मम पदं कियत्याकृतं
त्वमुत्र न तदा मया सहृजया धिया लोपितः ॥
नाकारि कियती चिन्ता मया प्रतिदिनं मुहुः ।
तथापि न कथं स्वान्ते विद्याोश्चिन्ता समागता ॥
श्रीकृष्णः सहायोऽस्तु । नमोऽस्तु गुरुचरणेभ्यः ॥

5324.

11194. *Prabodha-candrodaya.*

Substance, country-made paper. 12 × 6 inches. Folia, 29. Lines, 8, 9 on a page. Character, modern Nāgara. Appearance, fresh. A mere fragment.

Colophon:—

17A, इति श्रीकृष्णमिश्रविरचिते प्रबोधचन्द्रोदये द्वितीयोऽङ्कः ।

The MS. ends abruptly in the third act.

5325.

8992. *Prabodha-candrodaya.*

With its commentary प्रकाश *by Rāmadāsa, the son of Bhaṭṭa Vināyaka.*

Substance, country-made paper. $9\frac{1}{2} \times 4$ and $10 \times 4\frac{1}{2}$ inches. Folia, 113. Lines, 9 and 14 on a page. Extent in ślokas, 4,000. Character, Nāgara. Fresh. Worm-eaten. Complete.

For the commentary see I.O. Catal. No. 4140, 4142, 4143. Oxf. No. 286.

5326.

6609. *Prabodha-candrodaya.*

With the commentary by Rāma-dāsa Dīkṣita.

Substance, country-madeipaper. $9 \times 5\frac{1}{2}$ inches. Folia, 76. In tri-pāṭha form. Character, Nāgara. Date, Saṃvat 1713. Appearance, old, worn-out and discoloured. Complete.

The text is well-known. The commentary also has been repeatedly printed in India. See I.O. Catal., No. 4139.

Last Colophon of the commentary :—

इति श्रीमद्भट्टविनायकात्मजदीक्षितरामदासविरचिते प्रकाशाख्ये प्रबोधचन्द्रोदयनाटकव्याख्याने जीवन्मुक्तिनिरूपणं नाम षष्ठोऽङ्कः ।

Post Colophon :—

संवत् १७१३ वर्षे आश्विन वदि प्रतिपद श्रीमौढ़ाकाख्याने लिखितमिदं पुस्तकम् । शुभमस्तु ॥ रामनाम सहाय ।

5327.

1667. *Prabodha-candrodaya-nāṭakam.*

With a commentary entitled prakāsa by Rāma-dāsa.

Substance, country-made paper. 13 × 6 inches. Folia, 81. Character, Nāgara. Date, Saṃvat 1884. Appearance, fresh. Complete. This MS. is in tri-pāṭha form.

Last Colophon :—

इति श्रीप्रबोधचन्द्रोदयटीकायां रामदासविरचितायां जीवन्मुक्तिनिरूपणो नाम षष्ठोऽङ्कः ।

Post Colophon :—

श्रीमत्प्रबोधचन्द्रोदयनाटकं सटीकं समाप्तम् । शुभं भवतु लेखकपाठकयोः ।

संवत् १८८४ मिती आश्विन वदि १२ ।

5328.

3339. *A commentary on Prabodha-candrodaya.*

By Rudra.

Substance, country-made paper. 17 × 3¾ inches. Folia, 28 to 45. Lines, 10 on a page. Character, Bengali. Appearance, discoloured. Incomplete at the beginning. From the concluding portion of the 4th act to the end of the work.

The last Colophon :—

इति रौद्र्यां टीकायां षष्ठोऽङ्कः। समाप्तो ग्रन्थः।

Post Colophon :—

यातेऽलिं तिग्मरश्मावपगतऋतभुगवायुमाने (?) शकाब्दे
वारे शौरेः समीतं रघुतनयमुपाध्याय चित्ते खदोर्मे।
श्रीमद्रुद्रेण यत्नात् कृतमिदमखिलं शास्त्रमालोक्य विप्रः
श्रीलश्रीरामशर्म्मा सुकविसुखकरं पुस्तकं संलिलेख॥

For the beginning of the commentary, see Oxf. No. 2[illegible]8.

It ends :—

जीवन्मुक्तस्यापि शरीरसत्त्वात् मैत्र्यादय इत्यादय इत्यादि पर्य्यन्तं पद्यं सुगमं। ब्रह्मातिरिक्तस्य चालीकत्वज्ञानं विवेकः, तस्य यथार्थत्वज्ञानं मोहः। शरीरेऽहंबुद्धिरहंकारः। सर्व्वोत्कर्षज्ञानं मानमित्यादिस्तु अग्राह्यिकानां पन्थाः। स च सुधीभिर्विभाव्य इति।

कर्त्तुमिमं परिबन्धं यो यो ग्रन्थो मयालोचि।
कुत्रापि स्खलितं चेत् तद्विज्ञेयं तदीयदोषेण॥
यद्यपि गौतमशास्त्रात् परिशोद्धुं शक्यते मया।
ग्राह्यिकमतपरिवृत्तौ सन्तं ननु बाधते भीतिः॥
रसिकं ब्रह्मणि वशिकं मैत्र्यादेः परिशोधने कुशिकं।
गुणवत्येषा टीका रमयतु निशं सुखेन रौद्री॥

5329.

4692. *A commentary on Prabodha-candrodaya.*

By Rudra-deva.

Substance, country-made paper. 14½ × 5 inches. Lines, 11 on a page. Character, Bengali of the nineteenth century. Appearance, fresh.

This is a defective manuscript. There are 29 leaves marked 1 to 29 and one leaf unmarked, containing the commentaries on the first three acts and that on the begin-

ning of the 4th act; there are 15 leaves more, numbered with the Bengali marks of *Paṇa*. These leaves contain the commentary from the prose portion marked 14 of act V in Hṛṣīkeśa Śastrī's edition to the end.

It ends :—

रसिकं ब्रह्मणि वणिकं मैत्र्यादेः परिशोधने क्षमिकम् ।
गुणवत्येषा टीका रमयत्वनिशं सुखेन रौद्री ॥
समाप्तश्चायं ग्रन्थः ॥
वाङ्गाला १२५९ शाल ता० विंशति नभः ॥ ० ॥
स्वाक्षर श्रीचण्डीवरशर्म्मणः मुदा लिख्यते ॥ पुस्तकमिदं श्रील-
श्रीयुक्तबाबुकाशीनाथ-रायचतुर्धुरीणमहाशयेर विदुषां जानाति ।

For the beginning and the end of the work see L. 2368.

The colophon of the first act gives the author's father's name as Harihara Tarkālaṅkāra Bhaṭṭācāryya.

5330.

3544. *Guṇavatī—a commentary on Prabodha-candrodaya.*

Substance, country-made paper. 17 × 3 inches. Folia, 48. Lines, 7 on a page. Extent in ślokas, 1,500. Character, Bengali. Date, Śaka 1640. Appearance, discoloured. Complete.

The last colophon is not given.

The scribe's note :—

शकाब्दादि १६४० ।
श्रीश्रीजाने दयाधाने चरणाब्जतले तव ।
श्रीकाशीरामकृतिना लिपिरेषा समर्पिता ॥
यत्पुस्तकमवलोक्य पुस्तकमेतन्मयालेखि ।
अन्यत्वं यदशुद्धं तद्विज्ञेयं तदीयदोषेण ॥
आदर्शजनितदोषो यद्यपि नहि वाधते सुधियम् ।
लिखनाकुलचित्तेन प्रतिसन्धीयतां तथापि किञ्च ॥

5331.

9864. *Prabodha-candrodaya-nāṭakam.*

With a commentary by Gaṇeśa, the son of Bhāvācāryya Viśva-nātha Dīkṣita.

Substance, country-made paper. 10 × 5 inches. Folia, 14. Lines, 13 on a page. Extent in ślokas, 400. Character, Nāgara. Appearance, tolerable.

The first canto only.

For the commentary, see Oxf. No. 286.

5332.

VEṄKAṬA-NĀTHA VEDĀNTA-DEŚIKA.

1119. सङ्कल्पसूर्य्योदयः । *Saṅkalpa-Sūryyodayaḥ.*

Substance, country-made paper. 12¼ × 6½ inches. Folia, 88. Lines, 14 on a page. Extent in ślokas, 2,980. Character, Nāgara. Appearance, tolerable. Complete.

A philosophical drama in 10 acts, an imitation of Prabodha-candrodaya. For extracts, see W. 1566.

The author was the son of Ananta Sūri, and the grandson of Puṇḍarīkākṣa Soma Sūri. He obtained the title of Vedāntācāryya from Raṅgarāja Divya-jñāna. He is also called Kavi-Tārkika-Siṃha, and is generally known as the founder of the Vaḍagala Sect in Southern India. He seems to have flourished three centuries after Rāmānuja.

5333.

8324. समयसारनाटकम् । *Samaya-sāra-nāṭakam.*

Substance, country-made paper. 11 × 4½ inches. Folia, 20. Lines, 10 on a page. Extent in ślokas, 500. Character, modern Nāgara. Date, Saṃvat 1912. Appearance, fresh. Complete.

A Jaina work in imitation of Prabodha-candrodaya.

Beginning :—

श्रीगणेशाय नमः ।

नमः समयसाराय स्वानुभूत्या चकासते ।
चित्स्वभावाय भावाय सर्व्वभावान्तरच्छिदे ॥ १ ॥
अनन्तधर्म्मणस्तत्त्वं पश्यन्ति प्रत्यगात्मनः ।
अनेकान्तमयी मूर्त्तिः नित्यमेव प्रकाशतां ॥ २ ॥
परिपरिणतिहेतोर्मोहनाम्नोऽनुभावात्
अविरतमनुभाव्यव्याप्तिकल्माषितायाः ।
मम परमविशुद्धिः शुद्धचिन्मात्रमूर्त्तेः ।
भवतु समयसाररद्दयैवानुभूतेः (?) ॥ ३ ॥
उभयनयविरोधध्वंसिनी स्यात् पदाङ्के
जिनवचसि रमन्ते ये स्वयं वान्तमोहाः ।
सपदि समयसारं ते परं ज्योतिरुच्चैः
अनवमनयचाक्षुन्नमीक्षंत एव (?) ॥ ४ ॥
... ...
अतः शुद्धनयायत्तं प्रत्यग्ज्योतिश्चकास्ति तत् ।
नवतत्त्वगतत्वेपि यदेकत्वं न मुञ्चति ॥ ७ ॥
चिरमितिनवतत्त्वच्छन्नमुन्नीयमानं
कनकमिव निमग्नं वर्णमालाकलापे ।
अथ सततविविक्तं दृश्यतामेकरूपं
प्रतिपदमिदमात्मज्योतिरुद्द्योतमानम् ॥ ८ ॥

3B. इति जीवाधिकारः—

समयसारव्याख्यामात्मख्यातौ पूर्व्वरङ्गः—अथ जीवाजीवौ एकीभूतौ प्रविशतः—.

Thus the nine *Tattvas* or truths of the Jaina philosophy are personified as those of the Vedanta philosophy in Prabodha-candrodaya.

It ends :—

स्वशक्तिसंसूचितवस्तुतत्त्वैर्व्याख्याकृतेयं समयस्य शब्दैः ।
स्वरूपगुप्तस्य न किञ्चिदस्ति कर्त्तव्यमेवामृतचन्द्रसूरेः ॥

Last Colophon :—

इति श्री[illegible]शास्त्रग्रंथं यं संपूर्णम् ।

Post Colophon :—

संवत् १८१२ शाके १७११ ज्येष्ठकृष्ण ६ चन्द्रवासरे लि० कृष्ण-प्रसाद ।

शुभं भूयात् ।

In a later hand :—

मालवीयोपनामक-काशीनिवासिमुकुन्दस्य इदं पुस्तकम् ।

5334.

KAVIRĀJA-ŚEKHARA ŚAṄKHA-DHARA.

8234. लटकमेलकम् । *Laṭaka-melakam.*

A farce in two acts, enacted before Govinda-deva.

Substance, country-made paper. 11×4½ inches. Folia, 12. Lines, 10, 11 on a page. Extent in slokas, 300. Character, Nāgara of the nineteenth century. Appearance, fresh. Complete.

गौरीचुम्बनचञ्चलं चलवनचंद्रप्रभामण्डलं ।
व्यावल्गत्फणिकुंडलं रतिरसप्रस्विन्नगण्डस्थलं ।
प्रौढप्रेमपरस्परापरिचयप्रोत्फुल्लनेत्राञ्चलं
शम्भोरस्तु विभूतये त्रिजगतामुन्मत्तगङ्गं शिरः ॥ १ ॥
... ... ॥ २ ॥

नान्द्यन्ते सूत्रधारः । अलमितिविस्तरेण ।

अपिच । प्रातः सद्भर्त्किरणप्रणिपातभीरुः
कच्छातटप्रणयिनीं मदनप्रशस्तिं ।
आस्तां जगत्त्रयमुदे तिरयन् भुजाभ्यां
गौरीनखक्षतपदावलिमिन्दुमौलिः ॥

गोविन्ददेवप्पृथितस्पृथिव्यां श्रीमान् महामोडलिकाधिराजः ।
कविप्रियो नाटकनर्त्तनार्थमादेशयन् मां रणरङ्गमल्लः ॥ ३ ॥

यदद्य वसन्तसमये विकाशसमुचितेन कविराजशेखरविरचितेन लटकमेल-नाम्ना प्रहसनेनास्मान् विनोदयेति ॥

2A. नेपथ्ये—अये कोयमनेकपण्डितमण्डितायां सभायां कविराजतो नाटयितुमुद्यतः ॥

सूत्रधारः । अलमतिप्रलपितेन । यतः—

चित्रं चरित्रं स्खलितव्रतानां शीलाकरः शङ्खधरस्तनोति ।

विद्वज्जनानां विनया [नुवर्त्तौ] धात्रीपवित्रीकरणः कवीन्द्रः ॥

किंच

गोविन्ददेवमन्त्रीश्वरपुरस्कृतायाः सरस्वत्याः कुतो दुर्ज्जनतर्ज्जनावकाशः ।

Last Colophon :—

इति निष्क्रान्ताः सर्व्वे । द्वितीयोऽङ्कः ।

इति श्रीकविराजराजशेखरविरचितं लटकमेलकं नाम प्रहसनं समाप्तम् ॥ संमत १९११ ।

Printed in Kāvya-mālā 20, 1889.

5335.

KĀÑCANĀRYYA-VĀDĪSVARA.

1643. धनञ्जयविजयः । *Dhanañjaya-vijayaḥ.*

Substance, country-made paper. 7×4 inches. Folia, 13. Lines, 12 on a page. Extent in ślokas, 200. Character, Nāgara. Date, Saṃvat 1527. Saka 1393. Old. Complete.

Colophon :—

श्रीवादीश्वरकाञ्चनार्य्यकृतः धनञ्जयविजयो नाम व्यायोगः समाप्तः ।

Post Colophon :—

श्रीरस्तु कल्याणं भूयाः संवत् १५२७ वर्षे शाके १३९३ प्रवर्त्तमाने अद्येह धूआरणवास्तव्य उदीच्यज्ञातीय श्रीमन्मन्त्रिभूपतिसुतेन भानुना लघुभ्रातृणां पठनार्थं तथा पुत्रपौत्राणां पठनार्थं तथा परोपकारार्थं धनञ्जयविजयं नाम नाटकं समाप्तमिति श्रीः ।

Printed by the late Tārānātha Tarka-vācaspati, Calcutta.

5336.

2772. *Dhanañjaya-vijayaḥ.*

Substance, country-made paper. 14½ × 4½ inches. Folia, 7. Lines, 10 on a page. Character, Bengali. Appearance, worm-eaten. Complete.

5337.

9286. *Dhanañjaya-vijayaḥ.*

Substance, country-made paper. 8 × 4½ inches. Folia, 12. Lines 10 on a page. Extent in ślokas, 264. Character, Nāgara. Appearance, tolerable. Complete.

Dhanañjaya-vijaya, a Vyāyoga or a heroic drama in one single act, having for its subject the contest between Arjuna and Duryodhana, which resulted in the triumph of Arjuna over his antagonist, the contest arising out of the cattle-lifting committed by the Kauravas, from the cow-pen of Virāta, while Pāṇḍavas were living with him in disguise.

See Oxf. No. 280. 140A.

The colophon runs :—

इत्येकाङ्को धनञ्जयविजयो नाम व्यायोगः समाप्तः ।

5338.

VARADĀCĀRYYA.

9678. वसन्ततिलकभाणम् । *Basanta-Tilaka—Bhāṇam.*

Substance, country-made paper. 10 × 4 inches. Folia, 11. Lines, 9 on a page. Extent in ślokas, 220. Character, Nāgara. Appearance, fresh. Incomplete.

Well-known, often printed and often noticed.

A short play in one act, based on the love story of Vasanta Senā, a dancing girl, and a Brāhmaṇa of Kāñcī.

See I.O. Catal., No. 4198.

5339.

AMAREŚVARA.

8235. धूर्त्तविडम्बनम् । *Dhūrtta-viḍamvanam.*

Substance, country-made paper. 10½ × 4 inches. Folia, 11. Lines, 12 on a page. Extent in ślokas, 300. Character, Nāgara of the sixteenth century. Appearance, discoloured. Complete.

A farce in two acts.

It begins :—

श्रीगणेशाय नमः ।

गौरीरूपविभूषणाम्बरधरां कृत्वा परां कन्यकां
प्रस्तावोचितहासकेलिचतुरैरालीजनैर्वञ्चितः ।
तत्कालं कुलपालिकाविहसितं श्रुत्वा विवाहोत्सवे
विश्वेषामभिवाञ्छितं वितनुतात् सव्रीडहासो हरः ॥

अपिच ।

चारिकाविहरणे रणज्झनत् चर्चराकुलितहंसकस्वनं ।
भूतये भवतु तत् सभासदां चन्द्रशेखरपदाम्बुजद्वयं ॥

नान्द्यन्ते सूत्रधारः ।

अलमति विस्तरेण । आज्ञापितोऽस्मि सकलपरिषदा यत्त्वया भरतवंशावतंसेन धूर्त्तविडम्बनं नाम प्रहसनं प्रयोक्तव्यमिति । तदधुना कुटुम्बकमानीय सङ्गीतकमनुतिष्ठामि ।

The author and his patron :—

2A. अस्ति तीरभुक्ति विषये हरिहसनभिधानं ब्रह्मपुरं । तत्र काश्यपवंशसारससहस्रकरो गङ्गेश्वरनामा अवसथिकतिलको बभूव ।

यस्य च

प्रारब्धयागक्रतदीप्तक्रताशनिर्यत्-
धूमावलीढगगनं भजतेऽधुनापि ।
तल्लक्ष्मणं परिणतं किल नीलमास्ते
कस्ते ननु सत्यसुकृतः सुकृती पृथिव्यां ॥

तस्यात्मजो निखिलनरपतिमुकुटतटघटितानेकजातीय-मणिगणकिरण-कीर्म्मीरितचरणकमलो धर्म्मेश्वरो बभूव।

येन च

कृत्वा दिग्विजयं तिता गुणवता भूमण्डलान्तर्गता
विद्वांसः कविकर्म्मममर्म्मनिपुणा एकैकशः सर्व्वतः।
योऽसौ वीरन्दसिंहदेवन्टपतिं जित्वोत्कलाधीश्वरं
शास्त्रोद्धारविधौ सकोषविषयं तद्राज्यमेवाग्रहीत्॥

तस्यात्मजश्चतुरुदधिवलयवसुं[ध]राधिष्ठातनरेश्वरशिरःशेखरी-कृतपदाम्बुजः श्रीनाथानुध्यानपरो ध्यानेश्वरोऽभवत्।

यं गद्यपद्यादिनिबन्धकाले धृताञ्जलिं मूर्द्धनि सत्कवीन्द्राः
श्रीविघ्नराजेन समं नमन्ति किं स्तूयते तस्य गुणातिरेकः।
तस्माद्दुग्धपयोनिधेरिव लसन्नित्यप्रवृद्धोदयः
सारेशो वसुधासुधांशुरुदभूत्तत्त् कलानां निधिः॥
योसौ नाटकनाटिकाप्रकरणव्यायोगनिर्म्माणभूः
यत्सूक्तामृतपानहृष्टहृदयैः सद्भिः सुधा बाध्यते।

यश्च

भगवतो वामनत्वं याचकत्वमवगत्येवा-
श्रितवत्यौ श्रीसरस्वत्यौ॥
तदङ्गजन्मास्ति पवित्रकर्म्मा निधिः श्रुतीनाममरेशशर्म्मा।
अनर्घसामान्यवरेण्यपुण्यसौजन्यसिन्धुः कविवृन्दबन्धुः॥

यस्य च

धनुष्मतास्पर्द्धयेव गुणः परां कोटिमधिरोहति।
यत्कीर्त्तिपूरःसुरसिन्धुस्पर्द्धयेव त्रिभुवनमाप्लाव[य]ति॥
यद्भणितिरपि सुधास्पर्द्धयेव द्विजराजराजत्वमनुभूयते।

यश्च

निःशेषक्षितिपालमौलिविलसत्-कोटीरकोटिस्फुरत्-
माणिक्यामलदीपिकाभिरसकृत् नीराजिताङ्घ्रिः प्रभोः।

पौरोहित्यमवाप्य नाथन्तपतेः क्ष्मौणीमहेन्द्रस्य यो

नित्यं नाकनिवासिनः सुरगुरोः कक्षां समालम्बते ॥

तेनात्मनो विनोदार्थं कवित्वगुणगुम्फितं ।

कृतं प्रहसनं भद्रं नाम्ना धूर्त्तविनोदनं ॥

End :—

तथापीदमस्तु ॥

विप्राः सन्तु सुखान्विताः सुकृतिनो नन्दन्तु विन्दन्तु च

पापिष्ठाः परवञ्चकाः निकृतिनः सीदन्तु वर्गान्विताः ।

धर्म्मो वृद्धिमुपैतु सम्प्रति कविः प्राप्नोति कीर्त्तिं परां

सभ्याः सन्तु निरामयाः सुतसुहृद्भ्रात्रादिभिः सन्ततम् ॥

इति निष्क्रान्ताः सर्व्वे । द्वितीयोऽङ्कः ॥

इति श्रीमदमरेश्वरविरचितं धूर्त्तविडम्बनं ॥

5340.

JYOTIRĪŚVARA KAVIŚEKHARA.

8224. धूर्त्तसमागमप्रहसनम् ।

Dhūrtta-samāgama—a farce.

Substance, country-made paper. 11 × 4 inches. Folia, 13. Lines, 7–11 on a page. Character, Nāgara of the nineteenth century. Appearance, old and discoloured. Complete.

A well-known farce in two acts.

Last Colophon :—

इति श्रीकविशेखराचार्य्यविरचितं धूर्त्तसमागमं नाम प्रहसनं संपूर्णं ।

Post Colophon :—

शुभमस्तु । रामभद्रस्य पठनार्थं ।

5341.

124. *Dhūrtta-samāgamam.*

Substance, country-made paper. 13 x 4 inches. Folia, 14. Lines, 6 on a page. Extent in ślokas, 200. Character, Bengali. Date, Śaka 1769. Appearance, fresh. Complete.

It is a farce in two acts. The title of the work means rogues meeting rogues, and not, as Rajendralāla says, a council of rogues. The Dhūrtas or the rogues are :—

(1) a yati or a recluse who is a great impostor and very fond of a public woman; (2) his disciple, Snātaka, madly in love with his Guru's lady-love; (3) Asajjāti Miśra with his Vidūṣaka who is approached by the contending parties to decide to whom the woman belonged and who at last gets hold of her by playing tricks and making fools of the contending parties.

The drama was enacted to welcome Hari Siṃha the king of Mithilā after his victory over the Emperor of Delhi. The author's Varṇana-ratnākara in Maithila is well-known. The attempt to identify the author's patron, with the king of Vijayanagara (because he is described as Karṇāṭa-rāja) is wrong. Because the dynasty of Hari Siṃha is known as the Karṇāṭaka dynasty of Mithilā.

The author Kavi-śekhara Jyotirīśvara was the son of Dhīreśvara and the grandson of Rāmeśvara, and flourished under the patronage of Narasiṃha of the Karṇāṭa dynasty in Mithilā.

Beginning :—

हर्षादम्भोजजन्मप्रभृति दिविषदां संसदि प्रीतिमत्या
श्वश्र्वा मौलौ पुरारेर्दुहितृपरिणये साक्षतं चुम्बमाने ।
तद्वक्त्रं मौलिवक्त्रे मिलितमिति भ्रमं वीक्ष्य चन्द्रः सहासो
दृष्ट्वा तद्वृत्तमाशुस्मितसुभगमुखः पातु वः पञ्चवक्त्रः ।

अपिच ।

वक्त्राम्भोरुहि विस्मितास्तवकिता वक्षोरुहि स्फारिताः ।
श्रोणीं सीमनि गुम्फितास्चरणयोरस्ताः पुनर्विस्तृताः ॥
पार्व्वत्याः प्रतिगात्रचित्रगतयस्तन्वन्तु भद्राणि वो ।
विद्रस्यान्तिकपुष्पसायकशरैरीशस्य दृग्भङ्गयः ॥

नान्द्यन्ते सूत्रधारः :—

अलमतिविस्तरेण, यदद्य—

नानायोधनिरुद्धनिर्ज्जितसुरत्राणात्रसद्वाहिनी
न्टत्यद्भीमकबन्धमेलकदलद्भूमिभ्रमद्भूधरः ।
अस्ति श्री[1]नरसिंहदेवन्टपतिः कर्णाटचूडामणि-
दृप्यत्पार्थिवसार्थमौलिमुकुटन्यस्ताङ्घ्रिपङ्केरुहः ॥
तस्योद्दण्डभुजप्रतापदहनज्वालानिरस्तापदो
राज्ञः सर्व्वगुणानुरागपदवीविद्योतनाचार्य्यकः ।
यो धीरेश्वरवंशमौलितिलको दातावदातांशय-
स्तस्य श्रीकविशेखरस्य कविता मच्चित्तमालम्बते ॥

तदनेन सकलसङ्गीतविद्याशेषविद्योतनाभिनवभरतेन पुरमथनपादारविन्द-द्वन्द्ववन्दारुकरपल्लवेन निखिलभाषापभाषासुभगभावुकसरस्वतीकण्ठाभरणेन अनवरतसोमरसास्वादकषायकण्ठकन्दलीनरीन्टत्यमानमीमांसामहोत्सवस्य रामेश्वरस्य पौत्रेण तत्रभवतः पवित्रकीर्त्तेर्धीरेश्वरस्यात्मजेन महाशासनश्रेणीशेखरेण श्रीमत्-पल्लीजन्मभूमिश-कविशेखराचार्य्य-श्रीमज्ज्योतिरीश्वरेण निजकुतूहलविरचितं धूर्त्त-समागमं नाम प्रहसनमभिनेतुमादिष्टोऽस्मि इत्यादि ।

End :—

राष्ट्रं समस्तं कपटेन भुक्तं
धूर्त्तक्रियाभिर्दयितेयमाप्ता ।
भवान् विनीतो मिलितश्च शिष्यो
नातःपरं मे प्रियमस्ति लोके ॥

---

[1] See Nep. Catal., Vol. I, p. 67, which reads हरसिंह for नरसिंह.

तथापीदमस्तु ।

काले सन्ततवर्षिणो जलमुचः शस्यैः समृद्धा धरा
भूपाला निजधर्म्मपालनपरा विप्रास्त्रयीनिर्भराः ।
स्वादुक्षीरनतौधसः प्रतिदिनं गावो निरस्तापदः
सन्तः शान्तिपरा भवन्तु सुखिनः सौजन्यभाजो जनाः ॥
इति निष्क्रान्ताः सर्व्वे ।

Colophon :—

महामहोपाध्याय श्रीलश्रीयुतसुराचार्य्यतुल्यकविशेखराचार्य्य-विरचितं धूर्त्तसमागमं नाम प्रहसनं सम्पूर्णम् ।

Post Colophon Statement :—

कान्तोऽलिखत् श्रीरजनीपदादिः
सन्नाटकं धूर्त्तसमागमाख्यम् ॥
ग्रहर्त्तुवाजीन्दुमिते शकाब्दे
शुचौ हिसशाङ्कपदं विचिन्त्य ॥

See Nep. Catal., page 66, and pref. XXXVII and L. 85.

5342.

ŚEṢA GOVINDA PAṆḌITA.

10579. मधुमतीनाटिका । *Madhumatī-nāṭikā.*

An imitation of Malavikāgnimitra.

Substance, country-made paper. 10½ × 4 inches. Folia, 9–22. Lines, 12 on a page. Extent in ślokas, 900. Character, Nāgara of the seventeenth century. Appearance, old and worn out. Incomplete in the beginning.

Madhumatī, the heroin, is an attendant of the queen, with whom the Rājā falls in love. The queen is very jealous as a matter of course and goes so far as to imprison Madhumatī, who was known by the name of Sañjīvanī. At last she is introduced to the queen as her own relative by Viśvādarśa, when announcing to her the victory of her

father (Dakṣiṇeśvara) over Kolanātha. Thus the revelations are made in the following lines:—

विश्वा—योसौ भवतो महामात्यो देवानीकः सोऽस्माकं बाल्यसखा।

राजा—अवैमि भवता सह विद्याभ्यासनिमित्तकं सोदरस्नेहं। ततस्ततः।

विश्वा—ततस्तेन युष्मच्चक्रवर्त्तित्वोपायमन्विष्यमाणेनाहं पत्रिकयैवं विज्ञापितः। यथा मे समीहितं सिध्यति तथा चिन्तयस्वेति। मयापि च तथैव चिन्तयता चिरादेषा भविष्यच्चक्रवर्त्तिगृहिणीलक्षणा ज्ञाता कलानाथस्य पुत्री मधुमती। निवेदितश्चैवमस्याः पिता।

राजा—ततस्ततः।

विश्वा—ततस्तेनापि भवानेवास्याः परिणेतृत्वेनानुमतः। किं पुनः प्रकटविवाहे मधुमतीवैमनस्यमाशङ्कमानेनाहं एकान्त एवमुक्तो यदत्रभवता कथमपि व्यपदेशं कृत्वा तत्र नीत्वा यथा मधुमती हस्तेनैवेयं राज्ञेर्पिता भवति तथा विधेयमिति।

राजा—ततस्ततः।

विश्वा—ततश्चाहं स्त्रीजनेष्वभुक्तमूलोद्भवेयं कतिपयदिनान्यन्यदेशे स्थापनीयेति व्याजं कृत्वा एनां सह गृहीत्वा ततो निर्यातः। ततश्च मध्येमार्गं

देवी यत्रोन्मथितमहिषा ब्रह्मशैलस्य शृङ्गे
मार्कण्डेयः कृतनिवसतिर्यत्र तेपे तपांसि।
गोदावर्य्यास्तटभुवि मुनेराश्रमे तत्र बाला
बालं विल्वद्रुतिरुहमियं लीलयैवोन्ममूल॥

राजा।— ततस्ततः।

विश्वा—

ततो मुनिः कोपि तदाश्रमस्थः क्रुधैवमेनां तरसा शशाप।
षण्मासमज्ञातसुहृद्दिदेशे निर्वन्धमासाद्य भवस्व दासी॥

etc. etc.

It ends:—

राजा॥ अतःपरमपि प्रियमस्ति। यतः।

नीतः शान्तिं शिखरिनिलयः कोलनाथः सपत्नः
स्फीतं प्रेमोद्वहति भगिनीमद्य संसाद्य देवी।

कान्ता चेयं करमुपगता चक्रवर्त्तित्वहेतुः
तत् किं वान्य त्रिजगति मया प्रार्थनीयं यदीश ॥
तथापीदमस्तु । भरतवाक्यं ॥ सन्तः सन्तु इत्यादि ॥

Last Colophon :—

चतुर्थोऽङ्कः ॥ समाप्ता चेयं श्रीशेषगोविन्दपण्डितकविकृतिर्मधु-
मतीनाम नाटिकेति ।

5343.

JAYA-DEVA.

4787. **प्रसन्नराघवनाटकम् ।** *Prasanna-rāghava-nāṭakaṃ.*

Substance, palm-leaf. 13½ × 2 inches. Folia, 16–76. Lines, 5 on a page. Character, Bengali. Appearance, old and damaged. Date, Śaka 1414. Incomplete at the end.

The manuscript was copied in the life time of the author.

Colophon :—

इति निष्क्रान्ताः सर्व्वे । सप्तमोऽङ्कः ।
इति कविराजश्रीमहादेवतनयकवौ + + श्रीजयदेवविरचितं
प्रसन्नराघवं नाम नाटकं समाप्तम् ।
+ + चतुर्द्दशचतुर्द्दशे सेषे कुजाह्नि ।
नीतं सम्पूर्णतामेतन्नाटकं राघवाश्रयम् ।
आचार्य्यशेखरस्यान्तेवासिनाभ्यर्हितस्य च ।
वागीश्वरेण सभ्यानां भाषमानस्य संसदि ॥

5344.

JAYA-DEVA PAKṢADHARA MIŚRA.

3510. *Prasanna-rāghavaṃ.*

Substance, country-made paper. 17½ × 3 inches. Folia, 57. Lines, 5, 6 on a page. Extent in ślokas, 1,596. Appearance, discoloured. Character, Bengali of the eighteenth century. Complete.

Colophon :—

इति महामहोपाध्याय श्रीयुतमहादेवभट्टतनयकौण्डिन्य-श्रीजय-

देव-पक्षधरमिश्रविरचितं प्रसन्नराघवं नाम नाटकं समाप्तम् ।

Printed at Benares.

5345.

9511. *Prasanna-rāghavaḥ.*

By Jaya-deva, the son of Mahādeva and Sumitrā.

Substance, country-made paper. 8½ × 4 inches. Folia, 20, leaves 3, 5 missing. Lines, 16 on a page. Extent in ślokas, 800. Character, Nāgara. Appearance, old. Incomplete.

Printed in the Paṇḍita. The author appears to be both a poet and a logician. His father is Mahādeva, and mother Sumitrā. He belongs to the Kauṇḍinya gotra. In the Prastāvanā are mentioned भास, कालिदास, हर्ष, बाण, मयूर and चोर, the last of whom belonged to the 11th century. From all these facts a conjecture is sometimes hazarded that the poet is the same as Pakṣa-dhara Miśra, who flourished in the 15th century.

5346.

RĀMA-BHADRA.

1791. **जानकीपरिणयनाटकम् ।**

Jānakī-pariṇaya-nāṭakam.

Substance, foolscap paper. 9½ × 4 inches. Folia, 125. Lines, 8 on a page. Extent in ślokas, 2,000. Character, Nāgara. Date, Saṃvat 1914.

This very manuscript is noticed in L. 63, as belonging to Babu Hariś-candra of Benares.

This was copied from another manuscript bearing date Śaka 1751.

कृतवायुनगक्षौणीशाके पौषासिते तथा ।

चतुर्दश्यां मन्दवारे रात्र्यां द्विप्रहरे तथा ।

गोपालोऽलीलिखच्चैतन्नाटकं हरितुष्टये ॥

The date of the present manuscript :—

संवत् १९१४ मिति आश्विन्यशुक्लसप्तम्या भृगुवासरे शुभमस्तु ॥

The author and his work from the Prastāvanā :—

2B. सू० किं तद् विस्मृतं भवत्या यदचिरनिर्म्मितं जानकीपरिणयं नाम रूपकमध्यापितासि ।

न० सहर्षं । दिठ्ठिआ दाणीमणुवोह्विअंमि अज्जेण जः स खु कवेः प्रबंधः सकै महाणुभावादो जस्सरामदीखिखदादो उपन्नो अस्सवादो विअ चंदो रामभद्दमखिंदो ।

सू० सम्यगनुस्मारितं भवत्या ।

यस्य स्तौति मितिं मनीषिसदसि श्रीनीलकण्ठा[ध्व]री
कौंडाज्योतिषिकश्च यस्य कुरुते संमानमार्य्यैः समम् ।
यस्यानुग्रहदृष्टिमर्पयति च श्रीवालकृष्णो गुरुः
सोयं दीव्यति चोक्कनाथमखिनामक्रीतदासः कविः ॥

यस्येदानीं

विदितः कविप्रबन्धो रघुवीरचरित्रवर्णनः पवित्रः ।
परिषद्रसोन्मुखीयं मम सर्व्वोऽयं भाग्यपरिणामः ॥

The author was the son of जस्सराम or Yajña-rāma Dīkṣita. He was admired by Nīla-kaṇṭhādhvarī, Koṇḍa the astrologer and his guru, Vāla-kṛṣṇa. He was a slave, though not bought, of Cokka-nātha Makhī. Aufrecht thinks, on what ground it does not appear, that he was the son-in-law of Cokka-nātha. He was born in the Kauṇḍinya family, in Kaṇḍara-mānikkā in the Tanjore District. He lived in the last decade of the 17th century. (Catal. Catalogum., Part II, p. 121.)

5347.

JĪVA-DEVA.

4272. भक्तिवैभवः । *Bhakti-vaibhavaḥ.*

Substance, palm-leaf. 15 × 1 inches. Folia, 106. Lines, 4 on a page. Extent in ślokas, 2,800. Character, Uḍiyā. Date, the 29th year of Mukunda-deva. Complete.

The author was patronised by Pratāpa-rudra-deva of Orissa.

Beginning :—

नमः श्रीभर्गदुर्गाभ्याम् ।

श्रीमल्लीलाशरीरोदयजनितसदाकुण्ठवैकुण्ठभोगो
योगोद्योगोपभोगस्थिरहृदयदरीसुन्दरीकेशरीन्द्रः ।
(हेतः श्रेयः) श्रेयोहेतुः पदाब्जाभजनकृतधियां नव्यनिव्याजभव्या
नव्यादव्यात् कृतात्मा भवभयविधुरा नाश्रितानीश्वरो वः ॥

... ...

नान्द्यन्ते सूत्रधारः ।

समन्तादवलोक्य—

वीजीभूतं स्थायिभावप्रकाण्डं
सन्धिस्कन्धं पल्लवैर्व्याप्तमङ्गैः ।
विष्कम्भाद्यैः कोरकैः सत्पताकं
नाट्यं वृक्षं संश्रये दृश्यपुष्पम् ॥

... ...

2B. इदं भगवतः क्षेत्रं भाग्येनासादितं मया ।
यतो भक्तिश्च मुक्तिश्च सख्याविव निषीदतः ॥

... ...

... ...

एते भागवतार्थतत्त्वकलनापीयूषकल्लोलिनी
मथ्यासङ्गनिरस्तसंसृतिमहादावानलोपद्रवाः ।
श्रीकृष्णाङ्घ्रिसरोजपुष्पतुलसीमालासमालालिताः
पुण्यानामिव राशयः समुदिता दृष्टा मया वैष्णवाः ॥

तद् गृहिणीमाहूय सङ्गीतकमनुतिष्ठामि ।

नेपथ्याभिमुखमवलोक्य—

आर्ये इतस्तावत् ।

प्रविश्य नटी—

अज्ज इयम्हि आणावेदु अज्जो ।

सूत्रधारः ।

स्वच्छन्दप्रसरेण दिव्यमहसा विभ्राजमानः सदा
श्रीनीलाचलनायको विजयते त्रैलोक्यचिन्तामणिः ।
यो ध्यातो हृदये क्षणं हरिरिति स्वैरं परं कीर्त्तितः
स्वात्मानं वितरत्यनादिनिधनं नित्योदितानन्दथुम् ॥

... ...

तत्रामी समये वसन्तसमये नानादिगन्तागता
धर्म्माचाररताः श्रुताखिलमताः विष्णोः पदाब्जे श्रिताः ॥
सर्व्वे भक्तिमतावतारपुरुषा विद्याकलासन्तताः
शुद्धा भागवता व्रताञ्चितरसाः शुभ्रा[ः] समित्यासते ॥

तदेतेषामग्रे भक्तिरसप्रधानं नाटकमभिनीय स्वाभिलषितं सम्पादयामः ।

नटी । अज्ज किमेदाणं भागवदोणं विह्नुवत्तिमेत्तरसिआणं अग्गे चणेन ॥ (आर्य्य किमेतेषां भागवतानां विष्णुभक्तिमात्ररसिकानाम नर्त्तनेन ।)

सूत्र । आर्य्ये किं न जानासि

... ...

3A. सङ्गीताय स्पृहयति मुनिर्नारदो विष्णुभक्तः ॥

3B. नटी । किन्तु ।—

सूत्र । प्रिये ।—श्रीभक्तिवैभवमिति श्रुतनामधेयम्
साक्षाद्भवन्निगमनिर्मलरूपधेयम् ।
शृङ्गारसाररससारणिभागधेयं
निर्मत्सरैः कृतिभिरत्र सदावधेयम् ॥

यत्र हि । ज्ञानं कर्म्मसमुच्चितं पुनरिदं योगो+सर्व्वं मतम्
तत्तद्वार्त्तिकवृत्तिसूत्रगलितं नानानिबन्धस्थितम् ।
शैवं पाशुपतं तथागतमतं निर्म्मौलिकं कौलिकं
सर्व्वं न्यायशतैः निरस्य निहितं कृष्णस्य शुद्धं मतम् ॥

नटी । कः पुनरत्र कविः ।—

सूत्र । किन्न जानासि ।—

अष्टौ हाटकचामराणि कनकच्छत्रं डमड्डिण्डिमं
यो लब्ध्वा प्रथितप्रतापविभवः श्रीरुद्रदेवेश्वरात् ।
श्रीजीवः कविडिण्डिमो नृपगुरुः षड्दर्शनीपण्डितो
भक्तिप्रस्थितदेशिकोऽखिलकलालङ्कारदीक्षागुरुः ॥

नटी । कथं सरसकवितापथपथिकस्य वञ्चतर्ककर्कशानां शास्त्रार्थानां एकप्रक्रमेण उपन्यासशक्तिः ।

सूत्र । प्रिये स तादृश एव ।

वासासारपरिष्कारसारसारस्वतः स्वतः ।
वितण्डावादिवेतण्ड कविडिण्डिमपण्डितः ॥

किं न जानासि ।

एकः परं रचयितुं प्रहरात् प्रबन्ध-
मेकः परं षडपि खण्डयितुं मतानि ।
शक्तो मुकुन्दपदपङ्कजचिन्तनेन
श्रीजीवदेवकविडिण्डिमपण्डितेन्द्रः ॥

4A. नटी । तथापि कवित्व-पाण्डित्ययोर्विरोधं मन्ये ।

सूत्र । प्रिये नहि नहि नहि,

... ...

सूत्र । दोलामहोत्सवकृते पुरुषोत्तमस्य
कोलाहलैः पिकगिरां ध्वनयन् दिगन्तान् ।
लोलालका[द्]बहलकुङ्कुमधूलिसिक्त-
चेलाञ्चलद्विजपटैर्मधुरुज्जिहीते ॥

Colophons :—

15B, इति श्रीमत्कविडिण्डिमराजगुरुजीवदेवाचार्य्यविरचिते भक्ति-वैभवनाटके विद्याविलोकनो नाम प्रथमोऽङ्कः; 30B, ०विद्यासमागमो नाम द्वितीयोऽङ्कः; 45B, इति श्रीमत्कविराजराजगुरुत्रिलोचनाचार्य्यतनयश्रीभगवद्दास[देव]भक्तिप्रस्थानप्रणयनपरमाचार्य्यश्रीमन्महामहोपाध्यायश्रीकविडिण्डिम-

वाहिनीपति-राजगुरुश्रीजीवदेवाचार्य्यविरचिते भक्तिवैभवे नाटके पाषण्डमर्द्दनो नाम चतुर्थोऽङ्कः; 61B, ०शुद्धसिद्धान्तोदयो नाम पञ्चमोऽङ्कः; 76A, ०कामदेवदेवनो नाम षष्ठोऽङ्कः; 86A, ०कामविजयो नाम सप्तमोऽङ्कः; 89A, ०अष्टमोऽङ्कः; 98A, ०नवमोऽङ्कः; ०भक्तिवैभवनाटकं सम्पूर्णम् ।

Post Colophon Statement :—

एकोनत्रिंशदङ्के क्षितिवलयवलद्वेषिणः श्रीमुकुन्दा-
भिख्यस्य ख्यातकीर्त्तेः रजतहरिदिने भाद्रमासेऽह्नि सौरे ।
कोऽपि क्षौणीसुपर्व्वा समलिखदमलं भक्तिमद्वैभवाख्यम्
मुख्यार्थं नाटकन्तत् कविवरपरिषद्गर्व्वसर्व्वस्वगुप्तिम् ॥

5348.

RŪPA GOSVĀMĪ.

3545. दानकेलिकौमुदी । *Dāna-keli-kaumudī.*

Substance, country-made paper. 14 × 4½ inches. Folia, 27. Lines, 8, 9 on a page. Extent in ślokas, 572. Character, Bengali of the early nineteenth century. Appearance, discoloured. Complete.

A short play, called Bhāṇikā, describing the dalliance between Rādhā and Kṛṣṇa.

See H. P. R., Vol. I, 164.

The following śloka in the prastāvanā seems to refer to the author Rūpa and his brother Sanātana, by a play on words.

2A, सूत्रधार । ... ...

तदत्र निजाभीष्टदेवतानुस्मरणमङ्गलमाचरेयं ।

इत्यञ्जलिं कृत्वा

रसिकश्रृङ्गारसञ्जः शीलेनोद्दीपयन् सदानन्दम् ।
निजरूपोत्सवदायी सनातनात्मा प्रवर्त्तयति ॥

L. 3278 notices a commentary on the Bhāṇikā, by Jīva-gosvāmī who distinctly gives the author's name as Rūpa.

The present MS. abruptly breaks off in the first line of the chronogram after the colophon, which gives the date of the composition of the work. The chronogram as quoted in H. P. R., Vol. I, 164 is obscure.

5349.

4600. *Dāna-keli-kaumudī.*

With Viśva-nātha Cakra-vartī's commentary.

Substance, country-made paper. 16½ × 5½ inches. Folia, 41. In tripāṭha form. Character, Bengali of the early nineteenth century. Appearance, discoloured. Complete.

For the work see H. P. R., Vol. I, 164.

It was composed in Śaka 1431, for the concluding verse in the present MS. runs :—

नान्दीश्वरे निवसता भाणिकेयं विनिर्म्मिता ।

गते मनुशते शाके चन्द्रस्वरसमन्विते ॥

The commentary begins thus :—

श्रीवृन्दावनचन्द्राय नमः ।

दानकेलिकलौ लुप्तधर्म्ममर्य्यादयोर्भजे ।

राधामाधवयोः कामलोभदम्भमदाप्लुतम् ॥

अथ सोऽयं रसिकमुकुटमणि ... ...

... श्रीरूपनामा ... ... दानकेलीकौमुदीं भाणिकां

निर्म्मिमाणः प्रवरनान्दीमुपश्लोकयन् मङ्गलमाचरति अन्तरित्यादि ।

The colophon of the commentary :—

इति श्रीदानकेलिकौमुदीटीका महती श्रीविश्वनाथचक्रवर्त्तिना विरचितेति ।

5350.

10799. **विदग्धमाधवः ।** *Vidagdha-Mādhavaḥ.*

Substance, country-made paper. 13 × 4½ inches. Folia, 2–24. Lines, 7 on a page. Character, Bengali of the nineteenth century. Appearance, discoloured.

A mere fragment.

A well-known drama of Bengal Vaiṣṇavism, written in 1549.

15B, इति विदग्धमाधवनामनाटके वेणुवादनविलासो नाम प्रथमोऽङ्कः ॥

5351.

810. *Vidagdha-Mādhava-nāṭakam.*

For the manuscript see L. 1609. This is a play in seven acts, the subject being Śrīkṛṣṇa's life and amorous sports with milk-maids in Vṛndā-vana.

See I.O. Catal., No. 4177.

The author's name is mentioned neither in this nor in the I.O. Catal. manuscript.

Published under Rūpa-Gosvāmī's name with a Sanskrit commentary and Bengali translation by Rāma-nārāyaṇa Vidyāratna, Baharampura.

In the Prastāvanā, however, the sūtra-dhāra says that he was inspired by Bhaktāvatāra Śaṅkara Deva to write and enact this drama. Śaṅkara-deva was an elder contemporary of Caitanya and was one of the founders of the Mahāpuruṣīya sect in Assam.

5352.

3869. *Vidagdha-Mādhava-nāṭakaṃ.*

Substance, country-made paper. 14 × 4 inches. Folia, 67. Lines, 7, 8 on a page. Character, Bengali of the eighteenth century. Appearance, discoloured and dilapidated.

See the previous number.

5353.

RĀMĀNANDA RĀYA.

3549. **जगन्नाथवल्लभनाटकम् ।**

Jagan-nātha-vallabha-nāṭakaṃ.

Substance, country-made paper. $15\frac{1}{4} \times 4\frac{1}{4}$ inches. Folia, 20. Lines, 6, 7 on a page. Extent in ślokas, 560. Character, Bengali of the nineteenth century. Appearance, fresh. Complete.

Colophon :—

इति श्रीरामानन्दराय-कवि-रचितं श्रीजगन्नाथवल्लभनाटकं समाप्तम् ।

See infra.

5354.

771. *Jagan-nātha-vallabha-nāṭakaṃ.*

For the manuscript see L. 1565.

It is a drama in 5 aṅkas on amorous pastimes of Kṛṣṇa with Rādhā, enacted before Gajapati Pratāpa-Rudra.

लघुतरलितकन्दरं हसितनवसुन्दरं ।
गजपति-प्रतापरूद्रहृदयानुगतमनुदिनम् ॥
सरसं रचयति रामानन्दरायः ।

It is known from the Caitanya-caritāmṛta, that the author was the Governor of the Godāvarī country under Gajapati Pratāpa-rudra, and that he was a staunch follower of Caitanya.

The author was the son of Bhavānanda Rāya.

3A, श्रीभवानन्दरायस्य तनुजेन श्री ... ... रामानन्द-
रायेण कविना ... ... इत्यादि ।

Post Colophon Statement :—

श्रीगौराङ्गकृपाबलेन च मया लालकिशोरेण वै
शाके षष्ठ समुद्रबाण (1576) भूमिते सप्तदशे माधवे ।
रामानन्दकवेर्विचित्रकवितासङ्गीतकं नाटकं
संलेख्य बहुयत्नतः शनिचरे ऋक्षे द्वितीयातिथौ ॥
पुस्तकमिदं श्रीहिरालालव्रज[व]ासिनः ।

5355.

10790. *Jagan-nātha-vallabha.*

Substance, country-made paper. 12¼ × 5 inches. Folia, 16. Lines, 6–10 on a page. Extent in ślokas, 425. Character, Bengali. Date, Śaka 1690. Appearance, discoloured. Complete.

A well-known drama on Kṛṣṇa in Vṛndā-vana, composed by order of Rājā Pratāpa-rudra of Orissa. See L. 1565.

Last Colophon :—

इति श्रीजगन्नाथवल्लभनामनाटके राधासङ्गमो नाम पञ्चमो-
ऽङ्कः ।

इति रामानन्दराय-कवि-विरचितं जगन्नाथवल्लभं नाम नाटकं
समाप्तं ।

Post Colophon :—

शुभमस्तु । श्रीश्रीराधाकृष्णाभ्यां नमः ।
श्रीमन्म + मह्हीमहेन्द्रनगरे श्रीमन्महानाटकं
नत्वा श्रीरघुनाथपादकमलं व्यालेखि यत्नादहं ।
विराजराजपुत्रारेर्यन्नाम चतुरक्षरं ।
पूर्व्वार्द्धं तव शत्रूणां परार्द्धं तव वेश्मनि ॥
श्रीसीतारामचन्द्राय नमः । शकाब्दाः १६९० ।

5356.

RUDRA CANDRA DEVA.

830. **ऊषारागोदया-नाटिका ।** *Ūṣārāgodayā-nāṭikā.*

By Rudra-candra Deva, Rājā of Kumāon, a contemporary of Akbar.

Substance, country-made yellow paper. Written in book-form. 9 × 6¼ inches. Pages, 56. Lines, 17 on a page. Extent in ślokas, 560. Character, Nāgara. Appearance, fresh. Complete.

See I.O. Catal., No. 4174 and L. 119 and 1225.

A play in four acts, based on the love-story of Ūṣā, the daughter of the Daitya Vāṇa, and Aniruddha, grandson of Kṛṣṇa, as related in Hari-vaṃśa.

Wilson attempts to identify the author with Pratāpa Rudra Deva of Telingana and Rājā Rājendralāla with Pratāpa Rudra Deva of Orissa. But the colophon, describing him as Kūrma-giri-vareśvara, identifies him unmistakably with Rudra Candra Deva, Rājā of Kumāon, a contemporary of Akbar, and the author of Śyainika-śāstra, etc.

5357.

2766. *Ūṣārāgodayā-nāṭikā.*

Substance, country-made paper. 11 × 5 inches. Folia, 29. Lines, 9 on a page. Character, Nāgara. Date, Saṃvat 1914. Appearance, fresh. Complete.

This copy of the MS. is noticed in L. 1225.

Colophon :—

इति श्रीकूर्म्मगिरिवरेश्वरश्रीमत्प्रतापचारितारितमोभास्कर-श्रीमद्रुद्रचन्द्रदेवविरचितोषारागोदया नाम नाटिका परिपूर्णता-मगात् ।

Post Colophon :—

संवत् १९१४ आश्विन्य शुक्ल ११ भौमवासरे ।

5358.

DVĀRAKĀ-NĀTHA.

4031. गोविन्दवल्लभनाटकम् ।

Govinda-vallabha-nāṭakam.

Substance, country-made paper. 14 × 4½ inches. Folia, 55. Lines, 7 on a page. Extent in ślokas, 1,300. Character, Bengali of the eighteenth century. Appearance, discoloured. Complete.

A drama on the youthful sports of Śrī-kṛṣṇa in ten aṅkas.

It begins :—

गङ्गेतिख्यातिरस्मात् पतति मधुततिर्याति पीतामृतातिख्याता नीतोत्तमाङ्गे गलगतगरलग्लानिनोग्रेण नूनम् ।
पीता गीता स्मृताऽपि श्रुतिपथमिलिताशेषसातं विधत्ते
श्रीमद्गोविन्दपादाम्बुजयुगमयतां मन्मनोऽलिः समन्तात् ॥

... ...

... ...

... ...

नान्द्यन्ते सूत्रधारः । अलमतिविस्तरेण । भोः भोः पारिपार्श्विकाः । अद्य खलु वर्षावसरेऽविरलजलधारया विधूतधूलिपटलधरामण्डलोद्दीप्तललामश्यामलवालशाद्वलसमूहदिगुणीकृतश्यामत्वतमालादिमहीरुहव्यूहे ... ... निहित नयनेन ... ... यशोदाकुमारसुकुमारपदारविन्दद्वन्द्वेन अमरावतीपतिपुरन्दरैश्वर्य्यमर्य्यादापराभावुकैश्वर्य्येण विषयवासना-वहिष्कृतराजर्षिवर्य्याम्बरीषासदृशेन, किं बहुना

कामातीतप्रदानं निजकृतिलघुताकारि यस्योद्भविष्यज्-
ज्ञात्वादौ कामदोऽसौ क्व च चतुरतया गोपितं कल्पवृक्षः ।
धेनुं कामप्रदां तां त्वणचरणविधौ मुक्तपाशां विधाता
धाता मन्ये तथासौ वलिरपि भगवद्व्याजतः प्रापितोऽधः ॥

उद्धर्त्तुं पापिपुञ्जान् अधिकलि विकलानीरितं मित्रमेतत्
किन्त्वेतत् सङ्गभङ्गात्तदपि ममपदं गोकुलं शोभितेन।
इत्थं यद्गोत्रमत्रागतमनु मिलितो मन्यमानं स्ववंशम्
तद्वंशं नन्दसूनुर्विलसति सबलः श्यामचन्द्राख्ययासौ॥

तेन द्विजकुलदुग्धवारिधिद्विजराजेन श्रीमता जगदानन्देनादिष्टोऽस्मि। हंहो चारणाचार्य्य यथा—

हरिचरितविचित्रं चित्तचौरं नराणां
सहृदयहृदयाब्धेः पूरणाम्बुस्वरूपम्।
अभिनवकृतिमुद्यद्गीतपद्यादिहृद्यम्
प्रकटय नटवर्य्य तं प्रबन्धं नु किञ्चित्॥

तत् कथय।—

कथमहो मयाऽयमाराधनीयः।
... ...
... ...
आं स्मृतम्॥

पारि। किं तं।

सूत्र। निखिल विद्यावारिः ... ... ०श्यामसुन्दर-पादारविन्दद्वन्द्वस्य श्रीरुक्मिणीकान्तनाम्नो द्विजवरस्य तनयेन ... श्रीनन्दनन्दन-पदारविन्दद्वन्द्वस्यन्दमानमकरन्दपानानन्दितमानसेन श्रीद्वारकानाथाभिधेन कविना तत्तद्गुणवर्णनसुन्दरं श्रीगोविन्दवल्लभनाम सङ्गीतनाटकं निर्म्माय समर्पितम्। तदभिनेष्यामः॥

The last Colophon :—

इति श्रीगोविन्दवल्लभनाम सङ्गीतनाटके दशमोऽङ्कः। समाप्तञ्चेदं गोविन्दवल्लभनाटकम्।

Then comes the following :—

श्रीमच्चैतन्यदेवप्रियतमन्टपतिः सुन्दरानन्ददेव-
स्तत्प्रेयान् पर्णगोपालक इति विदितो विश्वविख्यातकीर्त्तिः।

काशीनाथोन्वयो(?)स्यास्य च विततयशाः कानुरामः कनिष्ठः
पुत्रस्तस्यापि धीरोऽजनि जनरमणः श्रीलगोपालसंज्ञः ॥
श्रीमद्गोकुलचन्द्रकोऽस्य तनयो ज्येष्ठस्य तस्यान्वयः
श्रीमान् सर्व्वगुणाकरः स जगदानन्दोऽस्य जाताः सुताः ।
चत्वारो निजसंज्ञया सुविदिताः ज्येष्ठोऽत्र सन् रुक्मिणी-
कान्तो + + + + + श्रीद्वारकानाथः ॥

5359.

JAGADĪSVARA.

5079. हास्यार्णवः । *Hāsyārṇavaḥ.*

Substance, country-made paper. 17 × 4 inches. Folia, 19. Lines, 6 on a page. Character, Bengali. Date, Śaka 1705. Appearance, discoloured. Complete.

The well-known comedy, often noticed and often printed.

Colophon :—

इति हास्यार्णवप्रहसनं समाप्तम् ।

Post Colophon Statement :—

शकाब्दा १७०५ ।

शाके डीक्षति भूतपाननवियद्वाजिक्षितौ फाल्गुने
मासे दिग्दिवसान्यतीत्य गतवत्यर्के सिते पक्षके ।
पञ्चम्यां जगदीश्वरेण रचितं हास्यार्णवं नाटकं
श्रीकाशीनाथनामा क्षितिसुरकुलजः पाठनार्थं लिलेख ॥
यत्नादात्ममनोहरार्थमलिखं यश्चोरयेत् पुस्तकम् ।
तद्भार्य्यां सुदतीं शशाङ्कवदनां नीचा हरन्तु द्रुतम् ॥

5360.

10200. *Hāsyārṇava—a farce.*

By Jagadīśvara Tarkālaṃkāra.

Substance, country-made paper. 10 × 5 inches. Folia, 18. Lines, 8 on a page. Character, modern Nāgara. Appearance, fresh. Complete.

Last Colophon :—

इति श्रीमहामहोपाध्या[य]-जगदीश्वरतर्कालङ्कार-भट्टाचार्य्य-विरचितं हास्यमहार्णवप्रहसनं समाप्तम् ।

Post Colophon :—

शुभं । लिखितं रघुनाथमालवीयेन श्रीसंवत् १९६१ आश्विन शुक्ल १२ गुरौ काश्यां मच्छोदरीतीर्थसमीपे त्रिलोचनेश्वरसन्निधौ गोघट्टनिकटे । श्रीमद्बगलामुखीदेव्यै नमः ।

5361.

9717. *Hāsyārṇava.*

Substance, country-made paper. 12 × 6 inches. Folia, 19. Lines, 10 on a page. Extent in ślokas, 456. Character, Nāgara. Appearance, tolerable. Complete.

Hāsyārṇava is a well-known comedy, satirizing various classes of the society, mainly the priestly class. Printed in Calcutta by Jīvānanda Vidyāsāgara.

5362.

9679. *Hāsyārṇava.*

Substance, country-made paper. 6 × 5 inches. Folia, 3. Lines, 10 on a page. Extent in ślokas, 50. Character, Nāgara. Appearance, fresh. Complete. Written in red ink.

5363.

MADHUSŪDANA SARASVATĪ.

8171. कृष्णाकुतूहलम् । *Kṛṣṇā-kutūhalam.*

Substance, country-made paper. 9½ × 4 inches. Folia, 99. Lines, 9 on a page. Extent in ślokas, 1,700. Character, modern Nāgara. Appearance, fresh. Complete.

A drama in 7 aṅkas.

Beginning :—

नीलां कंचुलिकां विमुच्य कुचयोरारक्तां सरोजेक्षणे
मुक्ताहारलता रथाङ्गयुगलश्रीशालिनी स्वर्धुनी ।
इत्याभाष्य विमुक्तकुन्तलकुलच्छायां करेणाम्टशन्
राधाया विनते स्मितानविधौ स्मेरो हरिः पातु वः ॥

The occasion of the play :—

2A. वाराणसीवरवर्णिनीकण्ठाभरणीकृत-सुरतरंगिणी-मुक्तालतेन्द्रनीलांकुरतरलेन जगदानन्दकल्पेन भगवता विन्दुमाधवेन स्वप्नान्तराले समाज्ञया समनुगृहीतोस्मि यद्भवद्भिः कृष्णाकुतूहलं नाम प्रबन्धमभिनयद्भिः स्वीयभुवनरंजनाभिधानोचितमाचरणीयमिति ।

The author and his antecedents.

2B. षट् तंत्री(त्रि)रसनांचलः कविगुरुर्योऽरुन्धतीगर्भजः
शाण्डिल्यान्वयमंडनो द्विजमणेर्नारायणस्याङ्गजः ।
शिष्यः कृष्णसरस्वतीयतिपतेराशैशवं वैष्णवः
संन्यासी मधुसूदनः सुरगुरो(?)द्वैतः स किं न श्रुतः ॥

Last Colophon :—

कंसध्वंसनो नाम सप्तमोङ्कः । इति श्रीपरमहंसपरिव्राजकाचार्य्यश्रीमधुसूदनसरस्वतीविरचितं कृष्णाकुतूहलनाटकं संपूर्णं ।

Post Colophon :—

श्रीसंवत् १८७५ शके १७ + + मीति जेष्ठ शुक्ल ६ नवमी शनवार हस्त नक्षत्र व्यतीपातयोग तद्दिने वेणीरामपंतदशपुत्रेण लिखितं स्वार्थं परार्थं च ।

This is evidently the date of the original fr[illegible]hich it is copied.

5364.

CANDRA-ŚEKHARA RĀYA-GURU

4288. मधुरानिरुद्धनाटकम् ।

Madhurā-niruddha-nāṭakam.

Substance, palm-leaf. 16 × 1½ inches. Folia, 59. Lines, 3[illegible]. Extent in ślokas, 1,100. Character, Uḍiyā of the eighteent[illegible]. Appearance, good. Complete.

For a description of the work see H.P.R., V[illegible], 207.

5365.

ANANTA-DEVA.

1724. कृष्णभक्तिचन्द्रिका । *Kṛṣṇa-bhakti-ca[illegible]*

By Ananta-deva, son of Āpa-deva.

Substance, country-made paper. 13½ × 6¾ inches. Folia, [illegible] on a page. Extent in ślokas, 400. Character, Nāgara. Date[illegible] Appearance, old. Complete.

Post Colophon Statement:—

शके पूर्णाग्निवाणेन्दौ कौलके कार्त्तिकेऽसिते ।
चतुर्थ्यां भौमवारे चालिखदिदं + + ॥

श्रीरस्तु । श्रीमता सह सवेधो न मे लक्ष्मा रोचते ।
गते तु मानहानिः स्यादागते तु धनक्षय[ः] ॥ ४१ ॥

A few lines more.

A drama on the fruits of faith in Śrī-kṛṣṇa, emb[illegible] the up-shot of a discussion among the Paṇḍitas of dif[illegible] schools and followers of different sects.

See L. 64 and Peterson's 2nd report, pp. 23 and [illegible]

5366.

9681. *Kṛṣṇa-bhakti-candrikā.*

Substance, country-made paper. 10 × 4½ inches. Folia, 7. Lines, 9 on a page. Extent in ślokas, 100. Character, Nāgara. Appearance, fresh. Incomplete.

A drama inculcating faith in Śrī-kṛṣṇa.

A fragment.

See L. Vol. I, p. 37, No. 64.

5367.

8380. *Śrī-kṛṣṇa-bhakti-candrikā-nāṭakam.*

Substance, country-made paper. 11 × 4½ inches. Folia, 22. Lines, 11 on a page. Extent in ślokas, 560. Character, Nāgara of the nineteenth century. Appearance, discoloured.

Complete in one act.

Beginning :—

श्रीगणेशाय नमः ।

कोपि स गोपिकुमारः स्फुरति समाजे व्रजस्त्रीणां ।

नवजलधर इव मध्ये तड़ितां परितः स्फुरंतीनां ॥

... ...

नान्द्यन्ते सूत्रधारः ॥

पुरतः पण्डितमण्डलीमाखण्डलसभामिव ... अवलोक्य स्वगतं ।

इह जगति सारासारविषयविचारचातुरीपरिचयधुरीण-

चित्तवृत्तीनां ... ... महापुरुषाणां ... ..

भगवद्भजनमेव कर्त्तव्यत्वेन सततं निरूपयता अनेन कविनानन्द

देवाह्वयेन त्यक्तलोकसंकोचमेवमुक्तोऽस्मि ।

End :—

क्लेशान् विनाशयति केशव एव पुंसां

सन्तोषमेव वचसां ततमातनोति ।

शीलं त्विदं भगवतः सहजं विबुध्य

जोषं वयं जगति साम्प्रतमस्य भृत्याः ॥

Colophon :—

इति श्रीमत्-आपदेवसूनुना अनन्तदेवेन कृतं श्रीकृष्णभक्ति-
चन्द्रिकाभिधानं नाम नाटकं समाप्तं ।

5368.

GOVINDA KAVI-BHŪṢAṆA.

4088. समृद्धमाधवनाटकम् ।

Samṛddha-Mādhava-nāṭakam.

Substance, palm-leaf. 14½ × 1 inches. Folia, 152. Lines, 5 in a page. Extent in ślokas, 3,300. Character, Uḍiyā of the eigh[teenth] century. Appearance, oldish. Complete.

A drama in seven acts on the amorous s[ports] of Śrī-kṛṣṇa and Rādhā.

It begins :—

श्रीराधाकान्तः शरणम् ।

धूतामित्रतमःक्रमाप्रशमितप्रेयस्वकोरभ्रमा
सुप्रीताश्रितकैरवागुरुविधुग्रावद्रवीभावकृत् ।
गोपालोम्बुजलोचनो भुवि लसद्भावोत्सवोज्जीवनी
पायाद्गोकुलचन्द्रभद्रकरुणापीयूषवृष्टिर्जगत् ॥

The poet :—

2B. प्रविश्य नटी—वच्छ आसवेदु ।

सूत्र । आर्ये कुत उदर्कतर्कः । पश्य—

नीलाचलमौलिनीलाचलजलधरमण्डलाडम्बरस्य ... ..

3A. श्रीमधुसूदनस्य जीवातु कृततचरणाराजीवभजनानां
नानांहःसङ्घसंहारि-तदीय-सिंहप्रतिहारीय-वेदिकावास्तव्यवास्तव्यापि
सभासभावन-मण्डनस्तयास्तया चपलतया विन्यस्तया च धृतिलतया ...
देवतामाराधयामः ।

नटी । यद्येवं तदत्र किं साधनम् ।

सूत्र । आर्ये भरद्वाजवंशावतंसावतारस्य विशिष्य प्रशमित

नैसर्गिक-संग्रयमयतत्त्वज्ञानान्तरायस्य गोविन्दकविभूषणसामन्तरायस्य स्मरसि क्वचित् ।

नटी । (स्मृत्वा) सिविणेवि तस्स न विसुमरेमि । किं उण जाअरे ...

... ...

3B. सूत्र । आर्ये—

तस्य कृतिः कृतिरुचिरं चिरं रसादिध्वनिप्रचुरम् ।

नव्यं काव्यमुदिते मधुरं हि समृद्धमाधवं नाम ॥

तेन प्रस्तावितेन तूर्णं लब्धवर्णविधान् आराधयामः ।

(सविमर्षं ।) अपि च ।

राधाबन्धोर्गुणमखिलनिर्यत्प्रबन्धोऽभिनेयः

कालः सन्तर्पितजनमनाः सन्ततश्रीर्वसन्तः ।

वर्यः सर्व्वः कलितललितापूर्व्वगान्धर्व्वपर्व्वा

निर्व्वाधं वो भविकमभितः सर्व्वथाविर्बभूव ॥

Last Colophon:—

इति श्रीसमृद्धिमाधवे तथ्यमनोरथो नाम सप्तमोऽङ्कः ।

5369.

MATHURĀ DĀSA.

829. **वृषभानुजा-नाटिका ।** *Vṛṣa-bhānujā-nāṭikā.*

Substance, country-made yellow paper. Written in book-form, 9 × 6¼ inches. Pages, 63. Lines, 17 on a page. Extent in ślokas, 630. Character, Nāgara. Date, Saṃvat 1920. Appearance, fresh. Complete.

This is a copy of the manuscript described in L. 1223, and it bears the date of the original.

Post Colophon :—

श्रीसंमत् १९२० ॥ मीः भोद सुक्ल । १० ॥

5370.

2767. *Vṛṣa-bhānujā-nāṭikā.*

By Mathurā-dāsa, a Kāyastha by caste and an inhabitant of the city of Suvarṇa-sekhara in the Madhya-deśa in the doab between the Ganges and the Yamunā.

For the MS. and the work see L. 1223, where, however, it is stated to have belonged to Babu Hariścandra of Benares.

Post Colophon:—

संवत् १९१० मीः ज्यैष्ठशुक्ल १० शुभ ।

5371.

VAIDYA-NĀTHA.

1194. **सत्सङ्गविजय-नाटकम् ।**

Sat-saṅga-vijaya-nāṭakam.

Substance, country-made paper. $11\frac{1}{2} \times 5\frac{1}{2}$ inches. Folia, 16. Lines, 10 on a page. Extent in ślokas, 400. Character, Nāgara. Date, Saṃvat 1914. Appearance, fresh. Complete.

An allegorical drama in five acts on the advantages of good company, composed at Mohamayī or Bombay, under the patronage of Jīvaneśa, the Superior, at Bombay, of the Vallabha sect.

For the beginning see L. 66.

Of the author and his patron the Prastāvanā says :—

पारि—भाव, कोऽसौ वैद्यनाथकविः ।

सूत्र—(सहर्षं समन्तादवलोक्य) मारिष

योऽसौ सुगन्धपुरैक्ककुलप्रसूतो
राजादिरामतनयो रघुनाथशिष्यः ।
सत्तर्कशास्त्रपरिशीलनतत्परोऽस्ति
श्रीजीवनाश्रितजनः खलु मोहमय्यां ॥

पारि—भाव, कोऽसौ श्रीजीवनेशः य एवंभूतविद्वज्जनाश्रयदानदक्षः।

सूत्र—(विहस्य) मारिष, साक्षात्तरणिमिव श्रीजीवनेशप्रभुमपि जानासि, शृणु तावत्।—

दैवोद्धारोत्थकीर्त्तिर्विपुलतरमहाब्रह्मसिद्धान्तवक्ता
श्रीकान्तस्यास्यरूपः समजनि सदयो वल्लभेशः पृथिव्यां।
तत्सूनुर्विट्ठलेशः श्रुतिगणवचसां मन्थने मन्दराद्रिः
पुत्राः सप्तैव तस्य प्रभुपदकमले भक्तिमुज्जृम्भयन्तः॥
तस्येत्थं प्रथितान्वये पृथुगुणैः पृथ्व्यां यशःपद्धतिं
प्रोद्भूतां प्रथयन् प्रचण्डचरितः श्रीजीवनेशः प्रभुः।
कारुण्यामृतवारिधिर्गुणगणग्रामैकधाम स्वयम्
पूर्णानन्दमयः प्रसन्नवदनः श्रीविट्ठलेशः परः॥

Post Colophon Statement :—

संवत् १९१४ चैत्रशुक्ल ६ वार मङ्गल।
श्रीकृष्णः ... ...

5372.

SĀMA-RĀJA.

8290. धूर्त्तनर्त्तकम्। *Dhūrtta-narttakam.*

Substance, foolscap paper. 11 × 5½ inches. Folia, 12. Lines, 11 on a page. Extent in ślokas, 228. Character, modern Nāgara. Appearance, fresh.

A farce—See Oxf. Nos. 274 and 275.

Colophon :—

इति श्रीधूर्त्तनर्त्तकनाटकं सम्पूर्णं।

Post Colophon :—

लिखितं रघुनाथमालवीयेन संवत् १९५७ मिति आश्विन शुक्ल प्रतिपदा चन्द्रवासरे शुभम्। काशीस्थगोघट्टवासी।
विद्वानेव हि जानाति ... ...

It is an incomplete MS., but said to be complete by the scribe.

5373.

10573.

Substance, country-made paper. 10 × 4½ inches. Folia, 1–17; 1–7. (Two sets of leaves.) Lines, 11 on a page. Character, modern Nāgara. Appearance, fresh.

A Sanskrit version of a Prākṛta drama having for its subject the love between Śrī-kṛṣṇa and the milkmaids. It is called "Candrāvalī-caritra-nāṭaka" on the top of the first page in a later hand.

I.

Begins :—

श्रीगणेशाय नमः ॥

भअवदीति—भगवति किं खलु यथार्थमेतत् ।

भअवदिन इति—भगवति यदि वृषभानुनन्दिनी राधिका त्वया कृष्णेन समं संगमनीया तदा संगमानुकूलवासं गोकुलमुज्झित्य प्रांतनुवासासन्ने भानुतीर्थे किमिति सा संगोप्य रक्षितास्ति। भअवदि तह्ववीति—भगवति तथापि कथं राज्ञा विज्ञाता राधा ।

The name of Candrāvalī-caritra occurs in the first line of 1B, but not as the title of the drama.

भगवति कंसस्य गोमण्डलाध्यक्षो गोवर्द्धनः कृष्णानुसारिणा चन्द्रावलीचरित्रेण कुतो न कुप्यति ।

कह्वमिति । कथं कृष्णेण प्रथमं तस्याः संगमः संवृत्तः ॥ etc. etc.

4A, वेणुनादविलासो नाम प्रथमोऽङ्कः; 8B, इति मन्मथलेखो नाम द्वितीयोङ्कः; 13A, राधासंगमो नाम तृतीयोङ्कः—

No more colophon in this set of leaves.

II.

Begins :—

भअवदीति—भगवति तवाज्ञां गृहीतुं । वार्षेति । वार्षभानव्या मथुराप्रस्थाने । दोणमिति । दयो राधामाधवयोस्तापलमेव । पिअवेति प्रियवयस्येन गोवर्द्धनेन । अदीति । अतिप्रसिद्धैषा प्रवृत्तिः केन वा न कथ्यते । आणेति । आज्ञापय ।

There is no colophon in this set of leaves.

5374.

9850.

Substance, country-made paper. $10\frac{1}{2} \times 4$ inches. Folia, 10 (11–20). Lines, 12 on a page. Extent in ślokas, 420. Character, Nāgara. Appearance, old.

This is a fragment of some unknown drama, comprising of the last two leaves of the second act, the third act in five leaves, and $11\frac{1}{2}$ leaves of the fourth. There is a praveśaka in 16B, belonging to the fourth act.

So far as can be judged from this fragment, the drama is written in an elegant style. The subject seems to be the killing of Kaṃsa by Śrī-kṛṣṇa, the fragment under notice containing that portion where Akrūra was taking Rāma and Kṛṣṇa to Mathurā, the Capital of Kaṃsa, his maternal uncle, to attend the Dhanur-yajña, performed by him. In the fourth act, they halt at Vṛndā-vana where a union of Rādhā and Kṛṣṇa is proposed and attempted.

The *dramatis personæ* as found in this fragment are as follows :—

ताल, गर्ग, अक्रूर, अक्रूरसारथि, प्रतिहार रत्नापीड़, दैवज्ञ, यशोदा, नन्द, राम, कृष्ण, सुदाम, वृद्धगोपद्वय, विलासवती राधावती ।

5375.

9247. **पञ्चतन्त्रोपाख्यानम् ।** *Pañca-tantropākhyānam.*

Substance, country-made paper. 13 × 5½ inches. Folia, 117. Lines, 11 on a page. Extent in ślokas, 3,000. Character, Nāgara. Date, Saṃvat 1850. Appearance, old, worm-eaten. Complete.

It was translated by order of King Khusru Nausirvan between 531–579. Composed say a century earlier at least.

It begins :—

श्रीगणेशाय नमः ।

वन्दे सरस्वतीं नित्यं वाङ्मनःकायकर्म्मभिः ।
वाक्समुद्रो यया नद्धो दुस्तरस्त्रिदशैरपि ॥ १ ॥
मनवे वाचस्पतये[शु]क्राय पराशराय ससुताय ।
चाणक्याय च विदुषे नमोऽस्तु तच्छास्त्रकर्त्तृभ्यः ॥ २ ॥
प्रणम्य विघ्नहर्त्तारं गणाध्यक्षमुमासुतं ।
नीतिशास्त्रमिदं वक्ष्ये कथामार्गनिबन्धनं ॥ ३ ॥
सकलार्थशास्त्रसारं जगति समालोक्य विष्णुशर्म्मेदं ।
तन्त्रैः पञ्चभिरेतच्चकार मनोहरं शास्त्रं ॥ ४ ॥

It ends thus :—

पवनगतिरिवातिचला अनार्य्यसङ्गतिरिवास्थिरा आशीविष इव दुरुपचारा सन्ध्यावलेखेव मुहूर्त्तरागा जलबुद्बुदालीव स्वभावभङ्गुरा शरीरप्रकृतिरिव कृतघ्ना ।

Colophon :—

इति श्रीराजनीतिशास्त्रे पञ्चतन्त्रोपाख्याने तृतीयतन्त्रं समाप्तं । संवत् १८५० मार्गशीर्षे ।

5376.

4780. *Pañca-tantraṃ, Kāvyaṃ.*

The first tantra only, written in Newari of the thirteenth century, measuring $11\frac{1}{2} \times 1\frac{3}{4}$ inches, with 7 lines, soiled.

Beginning :—

ॐ नमः सरस्वत्यै ।

मनवे वाचस्पतये शुक्राय पराशरायससुताय ।
चाणक्याय च विदुषे नमोऽस्तु नृपशास्त्रकर्त्तृभ्यः ॥
ग्रन्थविस्तरभीरूणां बालानां मन्दधीमतां ।
बोधाय पञ्चतन्त्राख्यमिदं संक्षिप्य कल्प्यते ॥
अन्यदीयोऽपि लिखितः श्लोकोयं प्रक्रमागतः ।
स्वल्पत्वाद् ग्रन्थविस्तारदोषस्तेन न जायते ॥

अस्तीह सकलदेवताधिष्ठानं सकलविद्वज्जननिवासं सकलकलानिधानं पाटलिपुत्रं नाम नगरं । तत्र सर्व्वगुणोपेतः सुदर्शनो नाम राजासीत् । स चात्मीयपुत्राणामनधिगतशास्त्राणामनुष्ठानेनोद्विग्नमनाश्चिन्तयामास ।

कोऽर्थः पुत्रेण जातेन यो न विद्वान् न धार्म्मिकः ।
तया गवा किं क्रियते या न धेनुर्न गर्भिणी ॥

इत्यादि ॥

5377.

9726. *Pañca-tantraṃ, Kāvyaṃ.*

Substance, country-made paper. 12 × 6 inches. Folia, 151. Lines, 10 on a page. Extent in ślokas, 1,800. Character, Nāgara. Appearance, decayed. Complete.

5378.

530. दशकुमारचरितम् । (पूर्व्वपीठिकामात्रम्)

Daśa-kumāra-caritam.

For the manuscript see L. 1289.

The last leaf missing. But a facsimile of the leaf faces the description of the work in L. 1289.

5379.

PADMA-NĀBHA.

318. दशकुमारोत्तरपीठिका ।

Daśa-kumārottara-pīṭhikā.

Printed at Bombay in the edition of Daśa-kumāra-carita.

Substance, country-made paper. 13 × 7 inches. Folia, 14. Lines, 8 on a page. Extent in ślokas, 280. Character, Nāgara. Date, Saṃvat 1919. Appearance, fresh. Complete.

The Daśa-kumāra-carita is generally supposed to have been written in the 6th century A.D. But the language and political geography would place it in B.C.

This codex contains a supplement to Daśa-kumāra-carita, which was left incomplete by its author Daṇḍin.

Rājendra-lāla writes in pencil: "Transcribed from a manuscript belonging to Paṇḍita Śītala-prasāda of the Sanskrit College, Benares. (No date....)."

5380.

10235. दशकुमारव्याख्या । *Daśa-kumāra-vyākhyā.*

Substance, country-made paper. 9 × 4 inches. Folia, 8. Lines, 13, 14 on a page. Character, modern Nāgara. Appearance, fresh.

A mere fragment.

Beginning :—

श्रीवक्रतुण्डाय नमः। विघ्नराशिं मम नाशयेति प्रार्थ्यते ॥

वृत्तान्तं प्रकारं। चन्द्रकपारेण समौ चन्द्रकमेचकौ जालपाद

इति, etc. etc.

2B. इति प्रथम उच्छ्वासः ॥

5381.

5839. दशकुमारचरितकथानकम्।

Daśa-kumāra-carita-kathānakam.

By Gopī-nātha.

Substance, country-made paper. 10½ × 5 inches. Folia, 108. Lines, 12 on a page. Extent in ślokas, 3,000. Character, Nāgara of the eighteenth century. Appearance, old and discoloured. Incomplete at the end.

An abstract of Daṇḍī's Daśa-kumāra.

It begins :—

ॐ नमः श्रीगणेश-सरस्वती-गुरुभ्यो नमः।

सर्व्वकामप्रदामिष्टदेवतां भुवनेश्वरीं।

प्रणम्य परया भक्त्या गणानामधिपं तथा ॥

गोपीनाथद्विजाधीशः सतां कौतुकहेतवे।

दशानां च कुमाराणां संशोधयति सत्कथाम् ॥

अस्ति पुष्पपुरं नाम मगधेषु महत् पुरम्।

महेन्द्रनगरीसारमादायेव विनिर्म्मितम् ॥

तत्रासीन्निर्जितारातौ राजहंसाह्वयो नृपः।

राजराजनमन्मौलिमालार्च्चितपदद्वयः ॥

अभूद्राज्ञी वसुमती तस्य भूमिपतेः प्रिया।

कमला केशवस्येव शिवस्य च शिवा यथा ॥

मतिशर्म्मा धर्म्मपालः पद्मोद्भव इति त्रयः।

आसन् मन्त्रिवरास्तस्य काव्यवाचस्पतिप्रभाः ॥

The first three ullāsas are in verse and the rest in prose.

The last colophon in the incomplete manuscript :—

97A, इति श्रीमहाराजाधिराजश्रीगोपीनाथसंशोधिते दशकुमारचरिते मन्त्रगुप्तचरितं नाम दशम उल्लासः ।

The 11th ullāsa breaks off abruptly.

There is one leaf marked 14, belonging to some manuscript of a commentary of Dasa-kumāra.

5382.

9003. दशकुमारकथासारः । *Dasa-kumāra-kathā-sāraḥ.*

By Rāma-candra.

Substance, country-made paper. 9 × 3 inches. Folia, 41. Lines, 9 on a page. Extent in slokas, 1,450. Character, Nāgara. Date, Saṃvat 1781. Old. Complete.

The colophon runs thus :—

इत्यागमि-रामचन्द्रोद्धृते दशकुमारकथासारे विश्रुतचरितं नाम दशमोच्छ्वासः समाप्तः ।

It begins thus :—

श्रीगणेशाय नमः ।

स जयति मानसजन्मा जन्मारम्भेपि धन्विनो यस्य ।
तरलयति युवजनानां मानसमनुरागिणी वृत्तिः ॥ १ ॥
अतिविश्लिष्टकथस्य क्वचिदपि गहनस्य दशकुमारस्य ।
विरचयति रामचन्द्रस्तत्पदरचनं कथासारं ॥ २ ॥

आसीत् पुष्पपुरे मगधाधीशो राजहंसो नाम राजा । तस्य च मतिशर्म्मा, धर्म्मपालः पद्मोद्भवश्चेति त्रयोऽमात्या बभूवुः ।

It ends :—

अथ पितरि वनवासस्थिते वामदेवशासनाद् उज्जयिनीमागत्य सागररसनां महीं शशासेति किमिह कृतमनेन दुर्जना[ना]मिति

वचनानि मुदे भवन्तु तेषां । विघटनघटनासमासयत्नात्मस्खलनविदः सुजना विदन्ति खेदं ।

5383.

9004. *Daśa-kumāra-kathā-sāra.*

By Appyāmātya.

Substance, country-made paper. 8 × 4 inches. Folia, 10. Lines, 13 on a page. Extent in ślokas, 300. Character, Nāgara. Fresh. Incomplete.

Ten leaves only.

It begins :—

श्रीगणेशाय नमः ।

श्रीवागुमापरां शान्तामेकवीरां महेश्वरीं ।
रम्यसाहित्यसौभाग्यसम्यक्सिद्ध्यर्थमर्थये ॥
श्रीगणेश्वरमाराध्य श्रीमदप्पय्यमन्त्रिणा ।
दशानां हि कुमाराणां कथासारो विरच्यते ॥
अस्ति (सन्ति) पुष्पपुरं नाम मगधेषु महत्पुरं ।
राजहंसाह्वयो राजा तच्छशासारिशासनः ॥

5384.

9368. **दशकुमारपूर्व्वकथासारः ।**

Daśa-kumāra-pūrva-kathā-sāraḥ.

Substance, country-made paper. 10 × 4 inches. Folia, 6. Lines, 8 on a page. Extent in ślokas, 120. Character, Nāgara. Appearance, very old. Incomplete.

This is an incomplete MS. of an abstract of the first part of the Daśa-kumāra-carita, the well-known romance of Daṇḍin, by Vīra-Bhadra, the son of Mahārājādhirāja Rāma-candra Deva. (See verse 58, Catal. No. 5398.) It comprises the first chapter only.

It begins thus :—

श्रीगणेशाय नमः ।

ताण्डवाड़म्बरे यस्य खस्ता खगिव मस्तकात् ।

भाति भागीरथी भूमौ भूत्यै तं भैरवं भजे ॥ १ ॥

वघेलयुवराज-श्रीवीरभद्रगुणाब्धिना ।

स्फुटो दशकुमाराणां कथासारो विरच्यते ॥ २ ॥

अस्ति प्रशस्तसमस्तवस्तुवस्तु मगधेषु पुष्पपुरं नाम पुरं । तच्चेलावलयावतंसो राजा राजहंसो नाम प्रचण्डशासनः शशास । तस्यामन्दसौन्दर्य्यनिर्जितनिर्जराङ्गना सती वसुमती नाम प्रियाभूत् । इत्यादि ।

The colophon of the first chapter runs :—

इति श्रीमहाराजाधिराजश्रीरामचन्द्रदेवात्मजयुवराजश्रीवीर-भद्रदेवकृते दशकुमारपूर्व्वकथासारे प्रथमः परिच्छेदः ।

5385.

SUBANDHU.

9721. वासवदत्ता । *Vāsava-dattā.*

Substance, country-made paper. $11\frac{1}{2} \times 5$ inches. Folia, 42. Lines, 8 on a page. Extent in ślokas, 830. Character, Nāgara. Date, Saṁvat 1721. Appearance, tolerable. Complete.

A well-known romance.

The last colophon runs thus :—

इति श्रीसुबन्धुविरचिता वासवदत्ता समाप्ता ।

संवत् १७२१ । समय वैशाख कृष्णचतुर्थ्यां चन्द्रे चिं वालकृष्णेन लिखिता ।

5386.

9289. *Vāsava-dattā.*

Substance, country-made paper. 12×5 inches. Folia, 24. Lines, 10 on a page. Extent in ślokas, 720. Character, Nāgara. Appearance, tolerable. Complete.

Vāsava-dattā, a well-known romance by Subandhu, often printed in India.

5387.

9276. *Vāsava-dattā.*

With the commentary entitled* तत्त्वदीपनी *by Jagaddhara.

Substance, country-made paper. 15×6 inches. Folia, 63. In tripāṭha form. Extent in ślokas, 2,400. Character, Nāgara. Date. Saṃvat 1848. Appearance, tolerable. Complete.

The last colophon runs:—

इति श्रीमहोपाध्यायधर्म्माधिकरणिजगद्धरविरचिता तत्त्व-दीपनी-वासवदत्ताटीका समाप्तं सम्पूर्णं ।

श्रीगोविन्दाय माधवाय नमः ।

यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥

संवत् १८४८ श्रावणमासे कृष्णपक्षे अमावस्यां काश्यां मध्ये गङ्गातटे विश्वेश्वरार्पणमस्तु । लिखितं मौजीरामब्राह्मणपठनार्थं महादेवजी पाठकः ॥ ॐ नमो भगवते वासुदेवाय नमः ॥

See L. Vol. V, p. 304, No. 1981.

The first two Maṅgalācaraṇa ślokas are wanting in the present MS.

5388.

4832. *Vāsava-dattā.*

Newāri MS. from Nepal. Entered *pro memoria.* MS. not traceable at the time of printing. Acquired in 1901 from Nepal.

5389.

BĀṆA BHAṬṬA.

4511. कादम्बरी (पूर्व्वार्द्धम्)। *Kādambarī (1st half).*

Substance, country-made paper. 18½ × 4½ inches. Folia, 162. Lines, 6 on a page. Character, Bengali of the nineteenth century. Appearance, fresh. Complete.

Composed in the first part of Śrī-harṣa's reign (606–648).

Colophon:—

इति भट्टमहाकवि-कविराजश्रीवाणविरचितः कादम्बरीपूर्व्व-खण्डः समाप्तः।

5390.

9287. *Kādambarī (1st part).*

Substance, country-made paper. 11 × 5 inches. Folia, 172. Lines, 10 on a page. Extent in ślokas, 4,128. Character, Nāgara. Appearance, tolerable. Complete.

5391.

10429. चषक (कादम्बरीटीका)।

Caṣaka, a commentary on Kādambarī.

By Śiva-rāma.

Substance, country-made paper. 9¾ × 4¼ inches. Folia, 8. Lines, 7–11 on a page. Character, modern Nāgara.

The leaves are marked with the letters शिवचषक. Another leaf marked 8, however, has शिवविद्याविलास, written on the margin.

There are four stray leaves, bearing the Library No. 10428, two marked in the margin with the letters Śiva, and two with the letters Vidyā-vilāsa, containing a work on grammar by Śiva-rāma, the author of the Caṣaka.

5392.

8233. **कादम्बरीटीका।** *A commentary on Kādambarī.*

Brief notes on the first half of Kādambarī—of Bāṇa Bhaṭṭa.

By Vaidya-nātha.

Substance, country-made paper. $10\frac{1}{2} \times 4$ inches. Folia, 20. Lines, 8 on a page. Character, Nāgara of the nineteenth century. Appearance, discoloured. Complete.

Colophon:—

इति श्रीमत्पदवाक्यप्रमाणाभिज्ञतत्सदुपाख्यरामभट्टसूनुना वैद्यनाथेन विरचिता कादम्बरीपूर्व्वार्द्धविषमपदविवृतिः संपूर्णा।

Beginning :—

ईशविष्णुकमलासनमुख्यैर्देवतैरपि समीहितसिद्धौ।
वंदितो गजमुखः सुखहेतुः सम्मुखो भवतु कार्य्यमुखेन॥

ग्रन्थारम्भे विघ्नविघाताय ब्रह्मविष्णुशिवरूपतया परमेश्वरं नमस्यति। रजोजुष इति।

5393.

9008. **चम्पूरामायणे बालकाण्डः।**

The Bāla-kāṇḍa of Campū Rāmāyaṇa.

Substance, country-made paper. 10×5 inches. Folia, 14. Lines, 8 on a page. Extent in ślokas, 225. Character, Nāgara. Fresh. Complete.

A poem in seven books. Different books are attributed to different authors. See Catal. Catalogum, Vol. I, p. 183, and I.O. Catal., No. 4043. The work is older than Rāja-śekhara who quotes it.

5394.

TRI-VIKRAMA BHAṬṬA.

283A. दमयन्तीकथा । *Damayantī-kathā.*

It is a romance in 7 chapters. The present MS. is incomplete at the end, breaking off abruptly at the 4th chapter, and is noticed in L. 1412. For a complete MS. see No. 68 of the same.

The work has been published under the title 'Damayantī-katha athavā Nala-campūh', with commentary, at Bombay (1885). See I.O. Catal. 4045. The author is stated there to have flourished about 1000 A.D.

5395.

73. *Damayantī-kathā.*

Substance, country-made paper. 10½ × 4 inches. Folia, 99. Lines, 6, 7 on a page. Extent in ślokas, 2,500. Character, Nāgara. Appearance, old. Incomplete.

For a notice of this work see L. 68 and 1412.

Two leaves pasted together, are made one. Some leaves are, however, in course of time disjointed and in this way, the leaf 2B is lost. The first leaf is also missing. The leaf 99A contains the colophon of the 5th Ucchvāsa which runs :—

इति श्रीविक्रमभट्टविरचितायां दमयन्तीकथायां पञ्चम उच्छ्वासकः ।

In the same leaf begins the 6th Ucchvāsa, but it abruptly breaks off in 99B. It is a poem on Damayantī, in prose and verse.

Printed in Bombay.

5396.

8158. *Nala-campūḥ.*

Substance, country-made paper. 12 × 5 inches. Folia, 97. Lines, 9 on a page. Character, Nāgara of the early nineteenth century. Appearance, old and discoloured. Complete.

Colophon :—

इति त्रिविक्रमविरचितायां विबुधमनोहारिण्यां दमयन्ती-कथायां सप्तम उच्छ्वासः समाप्तः ।

Prof. Kielhorn (Epigraphica Indica, Vol. I, p. 340) comes to the conclusion that our author Tri-vikrama Bhaṭṭa is the ancestor of Bhāskarācārya, the astronomer, mentioned in a Patna inscription. But it is unacceptable in the present state of our knowledge.

The work is quoted in Śārṅgadhara-paddhati, Subhāṣitāvalī and Padyāvalī, but is quoted neither in Sarasvatī-kaṇṭhāvaraṇa, nor in Sadukti-karṇāmṛta [Catal. Catalogum, Vol. I, p. 244].

5397.

KṢEMENDRA.

2763. बृहत्कथा । *Vṛhat-kathā.*

Substance, country-made paper. 11×4½ inches. Folia, 22 by counting. Lines, 11 on a page. Character, Nāgara. Appearance, old, discoloured and damaged.

A fragment. The right hand side of the MS. being wholly corroded, the leaf marks are lost. We get the following colophons :—

इति क्षेमेन्द्रविरचितायां बृहत्कथा + + + पाठा प्रथमलम्भकः ।

गुणाढ्येनेति लिखितां श्रातवाहनभूपतिः ।

कथामिमामकथयत् विदुषां सुहृदां पुरः ॥

इति क्षेमेन्द्रविरचितायां बृहत्कथायां लावनाको नाम तृतीयो लम्भकः ।

इति क्षेमेन्द्रविरचितायां कथामुखो नाम द्वितीयो लम्भकः ।

इति क्षेमेन्द्रविरचितायां कथामुखे सहस्रानीककथा ।

There is also a leaf containing the beginning of the fifth skandha of the Bhāgavata.

Stein Rajat, Vol. I, Book I, śloka 13, notes "he lived

under King Ananta-deva (1029–1064) and his son Kalaśa (1082)".

5398.

BHAṬṬA SOMA-DEVA.

986. कथासरित्सागरः । *Kathā-sarit-sāgaraḥ.*

Substance, country-made paper. $13\frac{1}{2} \times 6\frac{3}{4}$ inches. Lines, 11 on a page. Two parts separately paged; the first part has 422 leaves and comes to the end of the 9th Laṃvaka called Alaṃkāravatī; and the second part covers 434 leaves, going to the end of the work. Character, Nāgara. Composed about 1070 A.D. (Macdonelle).

The Post Colophon Statement in the first part:—

वैशाखमासे सितकामतिथ्यां
श्रीभावसिंहाख्यनृपाज्ञयैव ।
व्यलेखि सद्रूपशिमिश्रकेण
पूर्व्वार्द्धमेतत्तु बृहत्कथायाः ॥

Last Colophon:—

समाप्तोऽयं कथासरित्सागरः ॥

The Post Colophon in the second part:—

शुभमस्तु । श्रीरस्तु । संवत् १८६९ ।

Then follow 7 leaves which contain 99 verses, giving a genealogy of the scribe's patron, Bhāva Simha, and the names of his courtiers.

ब्रह्माण्डानि विभान्ति यत्र महभूभागे तरङ्गा इव
ग्रीष्मर्त्तौ प्रकृतिर्विवर्त्तयति यत्त्रैगुण्यविस्तारिणी ।
दिक्कालादिपरिच्छिदा विरहितं सर्व्वञ्च यद्भासते
ब्रह्मानन्तमशेषवेदगदितं सत्यं सदोपास्महे ॥ १ ॥
स्वात्मानं प्रकटीकरोति विधिना तत्त्वस्य वेत्तुः पुरो
यश्चाविष्कुरुते निजान्नविषमान् दोषान् यतः शङ्किता (?) ।

ब्रह्माण्डं समवायिकारणतया व्याप्नोति या सर्व्वतः
तां मूलप्रकृतिं प्रपञ्चभयतो मुक्त्यै सदोपास्महे ॥ २ ॥
समस्तापीड़ाधिपमुकुटनानाविधमणि-
प्रवेकानन्तद्युत्पवनरतनीराजितपदः ।
प्रचण्डारिव्यूहाटविमथनधूमध्वजसमो
वघेलानां वंशो जयति विदितो भूमिवलये ॥ ३ ॥
स चापशौर्य्यातिविनिर्ज्जितापरः
प्रतिक्षणानन्दितगुर्ज्जरेश्वरः ।
भक्त्या समाराधितसाधुशङ्करः
प्रभुत्वगर्व्वाङ्कितमानमन्दिरः ॥ ४ ॥
स्वतः प्रसिद्धे भुवि सद्विधेर्म्मधे
वघेलवंशे + + सम्भवो विधेः ।
स कर्णदेवः प्रबभूव गुर्ज्जरे
स्थिते कवेर्वर्णनतः कलौ परे ॥ ५ ॥
सरस्वतीदत्तवरः कवीश्वरः क्षितावहो कुत्र चकास्ति कः परः ।
विभोर्गुणग्राममदभ्रपौरुषं वितन्वतो वर्णयितुं स ईश्वरः ॥ ६ ॥
सुतः सुपुण्याम्बुनिधेस्तु चन्द्रमाः सुहागदेवोस्य बभूव विक्रमात् ।
अनूनकर्म्मा निजधर्म्मवर्म्मणा विभूषितः पाणिपदाब्जलक्ष्मणः ॥ ७ ॥
विलोकितो येन जनेन पूजितः
सुखी जनो जीवति रूपवन्दितः ।
विरुद्धभावे भुवि यस्य नन्दितः
सदा नरैस्तत्र बुधः स मानितः ॥ ८ ॥
ततः सुधांशो खिल तुल्यसद्विधः
सुतः स सारङ्ग इति श्रुतो बुधः ।
पुरन्दरवःप्राच्यतनूजजापकः
शिवार्चनाकर्म्मचयेष्ठयावकः ॥ ९ ॥
सुवीरपट्टादिकवीरभूषणः
प्रतिक्षणात्क्षत्रियराजभीषणः ।

विपक्षलक्ष्मातिबलारिदारणः
क्ष्मासु बभ्राम यशःपरायणः ॥ १० ॥
अनेकराजन्यसमाजसम्मतः
प्रभूतजन्यार्ज्जितकीर्त्तिभूषितः ।
ततोऽभवद्वीसलदेवभूपतिः
समस्तविद्यानिलयो रविप्रभः ॥ ११ ॥
भरान्वये वीसलदेवराधितो
धनैरमानैर्बङ्गराजमानितः ।
कलिञ्जरे निर्ज्जरनायिकाजिरे
सुशोभिता यत्र गुणास्ततः परे ॥ १२ ॥
तत्सुनुरासीत् कमलायताक्षो
गभीरनाभिः सुकुमारदेहः ।
महाबलानां धुरि कीर्त्तनीयो
नाम्ना प्रसिद्धः स तु भीममल्लः ॥ १३ ॥
कोदण्डमातन्वति यत्र राज्ञि
को दण्डदो नैव भवेदरातिः ।
बभूव दाता जितषट्सपत्नकः (पल्लवः)
तदात्मजो रानिकदेवनामा ॥ १४ ॥
धनुर्द्वितीयः सकलावनीपान्
प्रसह्य यो वै नमयाञ्चकार ।
तदात्मजः शीलवतां वरिष्ठः
कान्दर्पमूर्त्तिर्वलनो बभूव ॥ १५ ॥
वलनस्य बभूव देहजो
दलको याचककल्पभूरुहः ।
विधुलेशललामसेवकः
सकलक्ष्मापतिमान्यशासनः ॥ १६ ॥
दलकेऽमलकेशचेष्टितो-
ऽमलकरो स मनोजसुन्दरः ।

यमवाप्य पतिं वसुन्धरा
बहु मेने न पुरातनान् पतीन् ॥ १७ ॥
तद्वंशजोऽभूद्धरियार नामा
य[श्च] प्रसिद्धिं गतवानुदारः ।
सदृग् भविष्णुर्ननु यन्मुखेन्दो-
रिन्दुस्तपः खे सुचिरं करोति ॥ १८ ॥
जिगाय यः खड्गलतासहायः
सपत्नवृन्दं वसुधासुधांशुः ।
बोलारदेवोऽभवदस्य सूनु-
र्वघेलवंशाब्धिमणिर्महौजाः ॥ १९ ॥
सपत्नमातङ्गशिरःप्रमाथी
तदात्तमुक्ताचयशोभिहस्तः ।
अनन्तदानाम्बुसुपूरिताशः (सः)
तदात्मजः सिंह (इ)ति सिंहदेवः ॥ २० ॥
आसीद्दासीकृतारिप्रबलरिपुमहामत्तदन्तावलाद्रि-
त्रासव्यादेशशक्तो द्विजनिकरलसन्नीरजाह्लादनार्कः ।
यद्दोर्दण्डाभिघातत्रुटदरिवदनैर्भूतले शत्रुरक्त-
स्रोतः-पूर्णे जनानां भवति मतिरियं भारती नीरजाढ्या ॥ २१ ॥
तत्रातिविनिर्ज्जितशत्रुवृन्दः
सत्रादियज्ञपरितोषितनिर्ज्जरेन्द्रः ।
दानोदपूरपरिपूरितवार्द्धिवृन्दः
श्रीमान् बभूव किं (भैरवदेव) वीरमभूपतीन्द्रः ॥ २२ ॥ (?)
वीरो वीरमनामासौ यमवाप्य पतिं धरा
समस्तपूर्व्वभूपाल-शोकं त्यजतु सादरा ॥ २३ ॥
तस्यात्मजो नरहरिर्नतभूमिपाल-
कोटीरकोटिमणिकोटिकरप्रदीपैः ।
नीराजिताङ्घ्रियुगलो नृपतिर्बभूव
संसेवितो भवदसन्निभभूमिदेवः ॥ २४ ॥

नरहरिरवतीर्णस्तत्कुले कीर्णतेजाः
प्रतिभटहटहस्तिस्तोमदावप्रचारः ।
सुरपतिरिव देवान् यः समग्रानधीशान्
निजचरणतलस्थाँल्लीलया सञ्चकार ॥ २५ ॥
तन्नन्दनः सकलशत्रुभयप्रदत्तात्
लोके बभूव नृपतिर्भयदाभिमानः ॥
गायन्ति देव-हरिणी-नयना यशांसि
स्वर्गेऽपि यस्य यदरातिभिराप्तसङ्गाः ॥ २६ ॥
सकलनरपरत्नं खड्गधारनिकृत्त-
प्रतिनृपतिशदन्वत् कीर्त्तिचन्द्रोदितश्रीः ।
प्रबलबहलवह्निप्रौढ़चण्डांशुतीक्ष्णः
प्रखरविमलतेजाः भैददेवो बभूव ॥ २७ ॥
अवतीर्ण इवामराधिनाथः
फणिनाथोपमवाऊदण्डचण्डः ।
रणविक्रमनिर्ज्जितारियूथो
गजयूथाधिपतिः प्रसन्नलक्ष्मीः ॥ २८ ॥
तस्यात्मजः स्मरहरप्रतिमाप्रभावः
श्रीशालिवाहन इति क्षितिपाल आसीत् ।
यस्य प्रतापतपनप्रकराभिताप-
भीत्याभजज्जलनिधिं वड़वानलोऽपि ॥ २९ ॥
यः सेनाजैत्रयाने तुरगरथघटा कोटि + + +
धूलिमूलान्धकारं शशितरणिकराप्राप्तमात्राविकारं ।
भेरीझंकारचञ्चज्जलधिचयचलन्नीरभारैः पताका-
प्रोद्दण्डाचण्डवातैः शमयति सुभगः क्ष्मातले चक्रवर्त्ती ॥ ३० ॥
तस्यासीत्तनयः सुभाषितनयः श्रीनिर्ज्जितेन्द्रात्मजः
क्षौणिपालमणिः प्रतापतरणिर्दीनेषु चिन्तामणिः ।
नानाशास्त्रवलः कलासु कुशलः प्रौढ़ारिकालानलः
कीर्त्त्यालङ्कृतसप्तचार्च्चिवलयः श्रीवीरन्टसिं[हो]न्टपः ॥ ३१ ॥

तस्यात्मजः शत्रुकदम्बसेना दावानलोऽभूदिह वीरभानुः ।
विपक्षनारीमुखकैरवीय-परम्परायाः सहसैव भानुः ॥ ३२ ॥
यत् खड्गाघातविद्धप्रतिभटरपरः प्रौढ़कुम्भीन्द्रकुम्भ-
व्यावल्गद्रक्तधाराक्षितितलमखिलं चारु सिंचिन्त्य एताः ।
कैलासं गैरिकाभारुचिरमभिनवं व्यादिशत्यः समन्तात्
रुद्रान्तावासभूभैरपरचयचयैर्व्याकुलान् सन्दिशन्ति ॥ ३३ ॥
सिन्दूरैरिव रञ्जयन् दशदिशः प्रौढानुरागैरिव
प्राप्तानन्दभरा प्रजा विजयते दिक्कुञ्जरांस्तर्ज्जयन् ।
नित्यं यद्विपुलोल्लसद्भुजबलप्रोल्लासिभल्लक्षत-
द्रोहोद्दीप्तकरीन्द्रकुम्भविगलद्रक्तप्रवाहोच्चयः ॥ ३४ ॥
तुरङ्गमखुरस्फुरद्धरिणचक्रधूलीभरैः
प्रयाणसमये रवावसिनप्रकाशे सति । (?)
प्रतापचयतेजसा भुवनवीरमुद्योतयन्
अयं त्रिभुवनेष्वभूत् सकलवीरभानुः स्वयम् ॥ ३५ ॥
अभूदयं श्रीसुकुमारदेव्या यदीयसेनासु विडम्बयन्ति
प्रभञ्जनानद्धुतवारिवाहात्तुरङ्गमामत्तगजोत्तमाश्च ॥ ३६ ॥
तदात्मजोऽयं प्रतिपक्षसेनादशाननव्याहतिरामचन्द्रः
निबद्धलोकाम्बुधिधर्म्मसेतुर्भुवः पती राजति रामचन्द्रः ॥ ३७ ॥
अयोध्या नगरी यस्य पुरन्दरशतैरपि ।
यदीयानुचराः सर्व्वे प्रतिपक्षविभीषणाः ॥ ३८ ॥
पवनात्मजबलकलिता सुग्रीवाराधिता यस्य ।
अङ्गदचर्च्चितशोभा सेना लङ्कां भयं तनुते ॥ ३९ ॥
देशे यस्य प्रस्तमहसो बान्धवो दुर्गरत्नं
धातुः कीर्त्तिं सृजति जगतां सर्ज्जकस्यैक एवम् ।
क्वापि स्फूर्ज्जच्छिखरमहिमारूढमार्त्तण्डरश्मि
र्लोकालोकाचल इव दिवा यत्र तेजस्तमश्च ॥ ४० ॥
यस्योदच्चत्प्रथमशिखरे भास्वति भ्राजमाने
तत्रस्थानां भवति दिवसव्याहृतिः कष्टसाध्या ।

पश्चाद्गच्छत्यमलचरमे पश्चिनीबान्धवेऽस्मिन्
रात्रिभ्रान्तिं प्रथयति जनो यत्र सर्व्वात्मनैव ॥ ४१ ॥
तस्मात् प्राच्यां प्रतीच्यां क्रमबललसत्स्फारितोच्छ्रायखङ्ग-
प्रोदञ्चच्चण्डभानुः सृजति बहुविधान् दीपभेदप्रथां यः ।
पार्श्वस्थानैर्मनुष्यैर्निहतविमलदृक्सम्प्रचारैर्धरित्र्या-
स्तर्क्यः सीमेव लोके स जयति नितरां दुर्गचूड़ामणीशः ॥ ४२ ॥
नैवोल्लङ्घ्य व्रजति सविता दक्षिणाञ्चोत्तरञ्च
पृष्ठं यस्य प्रसृतकिरणाव्याप्तभूमण्डलोऽपि ।
पर्य्याप्तावप्ययनयुगलस्योल्लसत् शृङ्गकोटी-
दीप्यद्दीप्तिः स जयति नितरां दुर्गसंघातमौलिः ॥ ४३ ॥
दृष्ट्वा दृष्ट्वा मुहुरतिलसद्वृद्धिमेतस्य सूर्य्यो
विन्ध्योत्थानभ्रमहृतमनाः स्थैर्य्यमार्य्यः प्रयाति ।
देवैः सेन्द्रैः स्खलितवचनैः प्रार्थितो ग्राम उच्चै-
राराद‌ाराधितपदयुगो व्योम्नि भूयोऽप्युदेति ॥ ४४ ॥
यत्राख्या उदितादिहोमपट(ठि)वो विप्राः स्फुटाम्भोरुह-
प्रोल्लासैरनुमाय सूर्य्यमुदितं सन्ध्यादिकर्म्मस्थिता ।
तद्वत्कैरवकोरकोल्लसदतिस्फीतप्रकाशद्रुमै-
र्जानन्ति स्म निशां निशाकरकरस्पर्शस्पृहां सिन्धवः ॥ ४५ ॥
पुष्पीयन्ति तरौ तरौ स्फटिकताशोभाजुषस्तारकाः
पत्रीयन्ति च तारका-विरहिता नीला नभोऽंशा अहो (अह) ।
किञ्चोच्चत्वमतःपरं कुमुदिनीप्राणप्रियश्चन्द्रमा
व्योम्नो मध्यगतोऽपि कुंदविकसत्पुञ्जीयति प्रत्यय (?) ॥ ४६ ॥
स्फटिकरचितभित्तिव्रातसंक्रान्तमूर्त्ति-
र्हिमरुचिरमलश्रीर्लक्षशो लक्ष्यतेऽत्र ।
अपि च गृहसमीपे सञ्चरद्भिर्मनुष्यैः
विमलकमलनेत्रैश्चित्रशोभाप्रचारः ॥ ४७ ॥
सौदामिन्यो हसितवदना यत्र कामिन्य एव
स्फीतश्रेणीघनमुचामिन्द्रनीलार्च्चिरोधः (?) ।

गर्ज्जन्मत्तद्विरदपटलीचीत्कृतिर्विन्दुसंघं-
चन्द्रज्योत्स्नाप्रसरविसरचन्द्रकान्तप्रवाहः ॥ ४८ ॥
मेघः क्वापि ध्वनति नितरां यन्नितम्बावलम्बी-
शुभ्रस्फीतः स्फटिकविशदो राजतीघण्टिकेन ।
नीलः क्वापि क्वनति विलसन्नीलपाषाणघण्टा
रम्या विद्युल्लसति च तयोर्हेमजन्येव रज्जुः ॥ ४९ ॥
पार्श्वे तस्य क्षितिपनगरी नागरीभिर्गरिष्ठा
जुष्टा शिष्टैर्विविधचरितैरिष्टसम्प्राप्तितुष्टैः ।
पुष्टा सौधैः स्फटिकविशदैरग्रसंलग्नरत्न-
श्रेणीशोभैरिव हिमगिरिप्रदङ्गलग्नैः स चन्द्रैः ॥ ५० ॥
उन्मत्त-द्विप-सङ्घात-चीत्कारचय-पूरितं ।
विभाति रामनगरं नगरङ्गमिवादधत् ॥ ५१ ॥
जाता यत्र द्युमणिकिरणास्यन्दिभिः सूर्य्यकान्तैः
काचिद्रम्या सरिदतिजलस्वच्छगङ्गाप्रवाहः ।
नीलैः संशोनकान्तैः (क्वाशुभ्रैः) मणिभिश्चित्रवेणीरम्या (?)
सेयं लोके जयति नगरी नागलोकादपीड्या ॥ ५२ ॥
पुरुहूतपुरं हसत्यजस्रं पुरमेतस्य महीपसङ्गमौलेः ।
निजसौधविलग्नचन्द्रकान्तद्युतिपूरच्छलतः तमिस्रवर्जं ॥ ५३ ॥
सौधाग्रप्रतिबिम्बितान् विसचयानालोक्य हंसा दिवि
स्वस्वस्थान् परितस्तुतानिति समुच्छ्रायस्य वैयग्रतः ।
मत्वा तद् ग्रहणाय (ग्रहसाय) यत्र सहसा सर्व्वे पतन्तः पुनः
स्वस्यापि प्रतिबिम्बदर्शनभयात् दिव्या द्युयाने रताः ॥ ५४ ॥
तस्य श्रीरामन्टपतेर्विषये तीर्थसेवितः ।
प्रयागोऽस्ति पुरा ब्रह्मा यत्राभूद्दीक्षितः स्वयम् ॥ ५५ ॥
मध्ये यस्य प्रसरति सदा जह्नुकन्याप्रवाहः
सान्द्रानन्दं दिशति जगतां दर्शनोन्मेषतो यः ।
स्नातो यत्र त्रिदिवयुवतीसार्थदोर्वल्लरीभिः
स्फीतैश्चक्रैश्चमरनिकरैर्वीज्यते देवतुल्यः ॥ ५६ ॥

सद्बिन्दवोऽपि करुणामृतसिन्धवो यत्
सच्छीकरा अपि दवा दुरितारणीनां ।
यस्याः प्रवाहपतिता अपि सन्तरन्ति
संसारवारिधिमपारमदीनसत्त्वाः ॥ ५७ ॥
हिमाद्रेः पार्व्वतीनाथः करुणेव निरन्तरं ।
आविर्भूता पुनात्येषा भुवनानां परम्परा ॥
राज्ञस्तस्य कुमारो भूपकदम्बावलम्बिनं विजयी
प्रतिभटनरपविडम्बनचतुरः श्रीवीरभद्राख्यः ॥ ५८ ॥
जानीमो देवजानीपतिरिव समधिष्ठाय काष्ठात्त्वमेषः
त्वद्दोर्दण्डप्रतापप्रततकृतवहः शत्रुपक्षानधाक्षीत् ।
अङ्गारास्तत्र गङ्गाजलविमलमतेर्ये विपक्षाम्बुजाक्षी-
लक्षैरक्षय्य(क्षैण्य)वाष्पैः शममुपगमितास्तेजसो भावभाजः ॥५९॥
श्रीवीरभद्रतनुजो विक्रमादित्यभूपतिः ।
जयन्त इव शक्रस्य बभूवानन्दविग्रहः ॥ ६० ॥
संग्रामे रिपुशोणितोद्धतजलो खड्गाभिघातत्रुटत्
शुण्डादण्डकठोरनक्रविकटाभिन्नारिवक्राम्बुजान् ।
भश्यद्वैरिकदम्बकेशनिचयप्रोदुच्छलच्छैवलां
यो नित्यं विदधाति नूतननदीं स्वर्गप्रदां वैरिणां ॥ ६१ ॥
तस्यासीदरिसार्थपार्थसदृशो दण्डप्रभावोऽर्थिनां
मासानां परिपूरणेन कथितो यः पारिजातो भुवि ।
श्रीमन्मन्मथसुन्दरो हरिहयस्पर्द्धी सदा सम्पदा
राज्यस्य त्रिजगत्प्रचारितयशा राजामरेशाभिधः ॥ ६२ ॥
तस्यासीत्तनयः सुभाषितनयः स्वच्छाशयोऽनामयो
यः ख्यातः करुणामयो निजयशःसम्प्राप्तलोकत्रयः ॥
संग्रामेषु पुरञ्जयो दिनकरभ्राजत्प्रतापोदयो
नित्यप्रोद्यदयो धनंजयसमः सोऽनूपसिंहो नृपः ॥ ६३ ॥
तद्राज्ञीकमलाभिधा हरिमिव श्रीदेवकी राघवं
कौशल्येव यमिद्धपावकनिभं प्रासोष्ट काले शुभे ।

पायात्तु श्रीमिथिलाधिराजतनया प्राणेशभक्ताग्रणी-
रुर्व्वीं सर्व्वगुणाकरो नरपतिः सो भावसिंहश्चिरं ॥ ६४ ॥
गाम्भीर्य्येण महोदधिमधरयन् दानेन वैरोचनिं
मत्या देवगुरुं प्रजावनगुणेनेक्ष्वाकुमुर्व्वीपतिं ।
कान्त्या मन्मथमोजसा दिनकरं भत्या महीमण्डलम्
जीव्यादेष चिराय बान्धवगिरेः श्रीभावसिंहः प्रभुः ॥ ६५ ॥
न देवद्रुः कल्पो नियति लिखितस्यापहरणे
दरिद्राणां गोष्ठे(?) निवसति सदूरेऽर्थिभयतः ।
न धेनुः सुत्रामः प्रभवति न चिन्तामणिरपि
क्षमेशोऽयं तु द्राग् वितरणजलैस्तत् कलयति ॥ ६६ ॥
यशश्चन्द्रं दृष्ट्वा निसशकलबिम्बं त्रिभुवनं
विभातुं यद्भासा विधुरतिसलज्जः प्रतिनिशं ।
विनिर्म्मायात्मानं नट इव चमत्कारकुशलो
विदित्वा तद्भावं विघटयति मन्ये नरपतेः ॥ ६७ ॥
के ते ग्रहाः किमथापि दिनं तदासीत्
आविर्बभूव न नृपेषु स कल्पवृक्षः ।
पृष्टास्त्वया सुमतिना नृपभावसिंह
सन्दर्शयन्ति गणकास्तव जन्मपत्रम् ॥ ६८ ॥
अमरापतिकरिभ्रमं बिभ्रतो भूधरस्था-
त्मजा दिव्यमुक्ता त्वया धारणीया ।
श्रुतौ नाथ छित्वा फणीन्द्रान् ययाचे
भवानीति देवं हरं + + + ॥
अथ विषमविलोचनो त्वरात-
स्तथेति प्रतिज्ञाय वाणादिदैत्येन्द्रवन्द्यो ।
यशोमौक्तिकं भावसिंहप्रभो प्रापलोकत्रये पूजितः ॥ ६९ ॥
सकलविबुधराजिचूड़ामणिस्पृष्टपादाम्बुजः
शेषशोभापरिस्पर्द्धिनीमाप्य मुक्तामथोचिन्तयत् ।

स्यादमुष्याः कथं भूषणं कर्णयोः
अतिविकसितकासकैलासकुन्देन्दुशङ्खावदातां
द्वितीयां कदाचिद् बधूः ।
प्रार्थयेदित्यसौ संशयानोऽर्द्धनारीश्वरोभूत्
ध्रुवं भाति मे ॥ ७० ॥ (?)
यद्दानाम्बुकृतालवालरचना यत्कीर्त्तिवल्लीगिरिं
शुभ्रं नागवलम्ब्य कुन्दधवला विश्वङ्गता राजते ।
यस्या ऋक्षगणं भवन्ति कलिकास्ताराधिपः सत्फलं
क्षीराब्धिच्युतनत् पयः परिचयादुग्धाब्धिरित्युच्यते ॥ ७१ ॥
यं पत्न्यो मदनं वदन्ति रिपवो दावानलं साधवो
मान्धातारमुदीरयन्ति विविधाः कल्पद्रुमं चार्थिनः ।
दिल्लीशो मनुते हितं नियमिनं यं दस्युजू(द्यू)कोत्करः
तातं सत्प्रकृतिश्च सो विजयतां श्रीभावसिंहो नृपः ॥ ७२ ॥
यस्मिन् वाञ्छति हेमदेविमृगयामक्षौहिणीभिः समं
प्राकारै(पाकरि)र्नगरीं निजां कलयति द्वार्दत्तलोहार्गलां ।
शेषोऽप्यानमितोन्नमत्फणाशतो धत्ते मणिं कच्छपो
दुःखाद्भारमुरीकरोति नितरां मेरुः समुत्कम्पते ॥ ७३ ॥
सम्राजो यवना द्विजातिदमनाः कालः कलिः सज्जन-
व्यूहाञ्जामृतदीधितिर्धृतिलता चण्डांशुरुज्जृम्भते ।
जीवेदर्थिजनो विशेषविदितोदारस्वभावः कथं
नोचेत्तं परिपालयेन्नरपतिः श्रीभावसिंहः प्रभुः ॥ ७४ ॥
दुर्गो यस्य चकास्ति बान्धवगिरिः प्राज्याज्यधाराहुतै-
स्तुष्टो यस्य कृताशनोऽस्ति विदिता रेवापुरी सुन्दरी ।
केदाकोटरहंसजातटमकुग्रामाः परिच्छेदकाः
सीम्नो यस्य भुवः सदावति सतः श्रीभावसिंहः प्रभुः ॥ ७५ ॥
नवनीरदरुचिरहरणतरणितनयातटकेतन-
मुरलीरवमाधुर्य्यगोपरमणीहृतचेतन-
धृतगोवर्द्धनशैलजम्भरिपुमानविनाशन

चिरनिग्रहतातहेतुकंसासुरनाशन
मगधाधिराजसेनादलनमधुसूदन(निमसदव)
श्रीभावसिंहभूपालमवदन्दश्रूककालीयदमन ॥ ७६ ॥
नरनिर्ज्जितफणिराजिदितिजदानववरवन्द्या
देवकुलारिनिशुम्भमहिषमथनादभिवन्द्या
केतकगौरललाटपट्टविलसच्छशिखण्डा
नैकमुण्डमयदामयुताहतदनुसुतचण्डा
पदशरणभक्तजनभयहरा रक्तवीजरिपुशासिनी
श्रीवान्धवेशमव्यादसौ विन्ध्यभूमिधरवासिनी ॥ ७७ ॥
शास्त्रारण्यसदाप्रचाररचनप्रख्यातकण्ठीरवो
धैर्यौदार्य्यसुशीलताजलनिधिः गम्भीरतासागरः ।
रूपेणानुपमो विवेककुशलः पीयूषवर्षी गिरा
सूरिस्तस्य विराजते नरपतेः श्रीवालकृष्णाभिधः ॥ ७८ ॥
समस्तविद्येन्दुकलाचकोरः समस्तसत्पण्डितचित्तचौरः ।
वैदग्ध्यसौजन्यसुरत्नडोरस्तस्यास्ति विद्वाननघः किशोरः ॥ ७९ ॥
साहित्यशास्त्रप्रवणैकचेताः
सत्तर्कविद्यारुचिरः सभायाः ।
भूषाप्रियो भूमिपतेरजस्रं
चकास्ति गोवर्द्धनवाजपेयी ॥ ८० ॥
विद्यारत्नसमुद्गकः सुजनतासद्धैर्य्यरत्नाकरः
पीयूषद्रववाक् सुरेज्यधिषणः पाश्चात्यगौड़ाग्रणीः ।
प्राज्ञः सामसुकौथुमाख्यविटपच्छान्दोग्यवेत्ता हरेः
भक्तो लालमणिस्त्वकास्ति नृपतेः क्ष्मादेवतावल्लभः ॥ ८१ ॥
सद्वाद्यद्विपविस्तिरस्कृतकविव्रीह्याश्रिया भारती
प्रागल्भ्येन च भारविर्ज्जितहविः सन्तर्पितेद्धानलः ।
श्रीमानौपगविः समस्तनिगमैः काव्येकविद्याटवी-
व्रजापञ्चमुखः कविर्विजयते राज्ञः कविर्वल्लभः ॥ ८२ ॥
सकलनिगमपारावारपारैकदृश्वा
[सुजन] गणनिकायामग्रगण्यः कुलीनः ।

परजनहितकारी सर्व्वशिल्पैकदक्षः
कमलनयननामा शोभते दाक्षिणात्यः ॥ ८३ ॥
योभूतपूर्व्वविभवो गोपीनाथो निजैर्गुणै-
वशीचिकीर्षति नृपं तत्प्रियाचरणे नमः ॥ ८४ ॥
कोटू विभाति नृपतेरतिवल्लभत्वात्
सम्पादिताखिलमनोरथराजिरुर्व्वी।
ताम्बूलसम्पुटमुदावनलब्धवर्णः
सन्नाहमोचनवरो नृपवर्म्ममित्रं ॥ ८५ ॥
गम्भीरत्व + + प्रजाजतरणिर्भूपालरत्नामणिः
विख्याता सरणीसुभाख्यधिषणावर्षेषु चूड़ामणिः ।
येनैषा धरणिस्वकास्ति सततं सर्व्वप्रजापालनात्
अक्षीणद्युमणिर्जगन्मणिरयं यस्यास्ति मन्त्रिव्रजे ॥ ८६ ॥
काव्याख्यानकलाविदग्धधिषणः श्रीभावसिंहो नृपः
काश्मीराद्भगवन्मुखोद्गतमिदं प्राप्योल्लसत्सद्रसं ।
संशोध्याखिलपण्डितैः कृतचमत्कारं ततो रूपणि-
दारालीलिखदद्भुतार्थगहनं सर्व्वार्थसारप्रदम् ॥ ८७ ॥
वृत्त्या नृत्यप्रवृत्तत्रिपुरहरजटाजूटभिन्नायकेश-
व्रातप्रौढ़ातिघातश्लथवहलनभःसन्धिवन्धाद्गलन्तः ।
कल्याणं कल्पयन्तु क्षितिविबुधतरोर्भावसिंहस्य राज्ञः
स्वर्गङ्गाविन्दुसङ्घा जनकुतुककरा कारका कैतवेन ॥ ८८ ॥
स पातु वः कैटभकंसहा यः
त्रासाच्छराणां विषमायुधस्य ।
राधां निजे वक्षसि नर्म्मशालां
सुवर्णसन्नाहमिवोन्ननाह ॥ ८९ ॥
दलितकुवलयापीड़ः कुवलयनीलो रमानिलयः ।
विपदुत्तारणशीलः करधृतशैलः स वः पातु ॥ ९० ॥
आभीरनारीभिरुदारदर्प-
+ + लीलाभिरुपास्यमानं ।

श्रीभावसिंहस्य शुभाय भूयात्
तत् ब्रह्म यत्रोपनिषत् प्रमाणम् ॥ ९१ ॥
नरवाहनदत्तसङ्गता विविधाश्चर्य्यरसा बृहत्कथा
रचिता ननु सोमशर्म्मणा कुरुतां शं नृपभाववर्म्मणः ॥ ९२ ॥
यां दृष्ट्वा यमुनां पिपासुरनिशं व्यूहो गवां गाहते
विद्युत्वानिति नीलकण्ठनिचयो यां द्रष्टुमुत्कण्ठते ।
उत्तंसाय तमालपल्लवमिति च्छिन्दन्ति यां गोपिकाः
कान्तिः कालियशासन[स्य]वपुषः सा पावनी पातु नः ॥ ९३ ॥
मन्दावधूतकरपङ्कजपद्मराग-
रत्नप्रभानिचयतर्ज्जितसर्व्वविघ्ना ।
वाग्देवता विनयनम्रशिरोधरस्य
श्रीभावसिंहनृपतेर्दुरितानि हन्यात् ॥ ९४ ॥
प्रत्यर्कति प्रतिफलं निखिलार्थमालां (?)
बालोपलालनकलामिव मन्यमानाः ।
आर्त्तं मरिमपि च सम्बिदमावहन्तो
यं योगिनोऽपि न यथार्थतया विदन्ति ॥ ९५ ॥
वरुणा सालय सहि यं वगहाकंधेनतिक्काचागहियं ।
गिरिजलकमलनिवासो सो देव तुह्माणं जय ॥ ९६ ॥
सभासदानां विप्राणां श्लोकानां च समूहकः ।
भावसिंहस्य तोषायालेखि रूपणिशर्म्मणा ॥ ९७ ॥
पाण्डवाग्न्यृषिचन्द्रेऽब्दे १७३५ विक्रमार्कात् स भूभृतः ।
भाद्रे मासि सिते पक्षे पूर्णिमायामलीलिखत् ॥ ९८ ॥
मङ्गलं लेखकानां च पाठकानां च मङ्गलम् ।
मङ्गलं सर्व्वलोकानां भूमौ भूपतिमङ्गलम् ॥
समाप्तश्चायं ग्रन्थो बृहत्कथाख्यः ॥

The scribe's composition is learned and not without its poetic beauty ; and he seems to have been one of the court-panditas of Bhāva-deva. The present MS. is transcribed by Rūpaṇi from the copy of Rājtaraṅgiṇī brought by

Bhāva-siṃha from Kāshmere, but revised by paṇḍitas of his court. (See verse No. 87.)

Major-General A. Cunningham in his "Report on a tour in Bundelkhand and Rewa in 1883-84," Vol. XXI, p. 107, names Duryo-dhana between Vikramāditya and Amara Siṃha, Bhāva Siṃha's grand-father. But we do not think that the learned scribe should have omitted a name only fourth from his patron in the ascending line.

5399.

314. शुकसप्ततिका । *Śuka-saptatikā.*

A complete MS. of 61 pages, of the foolscap size, half-bound in leather.

See L. 1213.

5400.

989. *Śuka-saptati.*

Substance, country-made paper. $9\frac{5}{8} \times 4\frac{3}{8}$ inches. Folia, 79. Lines, 10 on a page. Character, Nāgara. Appearance, tolerable. Complete.

Another copy of the above.

5401.

NĀRĀYAṆA.

4861. हितोपदेशः । *Hitopadeśaḥ.*

Substance, palm-leaf. 12 × 2 inches. Folia, 108. Lines, 5 on a page. Character, Newari. Appearance, mouse-eaten at the right hand side. Complete.

End :—

107B, विष्णुशर्म्मणोक्तं । अपरं किं कथयामि तदुच्यतां ।
राजपुत्रा ऊचुः । आर्य्य, भवतः प्रसादात् राज्यव्यवहाराङ्गं ज्ञातं
तत् सर्व्वात्मना सुखिनो भूता वयम् ।
विष्णुशर्म्मोवाच । तथाप्यपरमिदमस्तु ।

सन्धिः सर्व्वमहीभुजां विजयिनामस्तु प्रसादः सदा
सन्तः सन्तु निरापदः सुकृतिनां कीर्त्तिश्चिरं वर्द्धताम् ।
नीतिर्वारविलासिनीव सततं वक्षःस्थलं संस्थिता
वक्त्रं चुम्बतु मन्त्रिणामहरहो भूयान्महानुत्सवः ॥

अन्यच्चास्तु ।

प्रालेयाद्रेः सुतायाः प्रणयनिवसतिश्चन्द्रमौलिः स यावत्
यावल्लक्ष्मीर्मुरारेर्जलद इव तड़ित् मानसे विस्फुरन्ती ।
यावत् स्वर्णाचलोऽयं दवदहनसमो यस्य सूर्य्यः स्फुलिङ्ग-
स्तावन्नारायणेन प्रचरतु चरितः(रचित)सङ्ग्रहोऽयं कथानां ॥

अपरञ्च ।

श्रीमान् धवलचन्द्रोऽसौ जीयान्माण्डलिको रिपून् ।
येनायं सङ्ग्रहो यत्नाल्लेखयित्वा प्रचारितः ॥

Colophon :—

इति हितोपदेशे सन्धिर्नाम चतुर्थः कथासङ्ग्रहः समाप्तः ।

औदार्ये सौकुमार्ये सुललितवचने शम्भुपादार्चने वा
सोदार्ये भीमशौर्ये गुणिगणभरणे सद्रणे तारणे च ।
आपन्नानां जनानां शरणगतवतां रक्षणे व्याप्तचित्तो
योऽसौ श्रीवीरमल्लस्तरणिकुलमणिः सर्व्वमन्त्रेषु जीयात् ॥

तस्य भूपतेर्महामन्त्री सकलनयनीतिगुणरत्नाकरस्य
कायस्थवंशकमलप्रविकाशभानु-
र्नैयायिकः सकलनीतिविदां वरिष्ठः ।
प्रत्यर्थिनां शरणिनां तरणैकचित्तः
संराजतेह भुवने वरभारसिंहः ॥

अपिच ।

योसौ मन्त्री सुधीरो नयविनयसुधाम्भोधिसंजातचन्द्रो
वाग्मीधुर्यः सुशीलो मदनतनुसमः सुन्दरो धर्म्मनित्यः ।
क्षीराम्भःकन्यकायाः पतिचरणसरोजे प्रणामो हि चेतो
जीयाद् भूमण्डलेऽस्मिन् सकलगुणयुतो भारसिंहः सुमन्त्रः ॥

तस्य महामन्त्रिणः पठनार्थञ्च

हितोपदेशकं शास्त्रं नीतिराजमनुत्तमं ।

लिखितं शोध्यतां सद्भिर्जगद्राजेन श्रद्धया ॥

5402.

3194. *Hitopadeśaḥ.*

Substance, country-made paper. 11½ × 4 inches. Folia, 19 to 79. Lines, 8 on a page. Character, Nāgara of the early eighteenth century. Incomplete both ends.

5403.

4579. *Hitopadeśaḥ.*

Substance, country-made paper. 13½ × 3 inches. Folia, 36. Lines, 6 on a page. Character, modern Bengali. Appearance, fresh. Incomplete at the end. Breaking off abruptly in the middle of the second section, Vigraha.

5404.

VIDYĀPATI.

10460. माधवानलकथा । *Mādhavānala-kathā.*

Substance, country-made paper. 5¼ × 3½ inches. Folia, 4–51, of which foll. 24–28, 36, 38 are missing. Lines, 8 on a page. Extent in ślokas, 240. Character, Nāgara. Date, Saṃvat 1810. Appearance, fresh.

A well-known story.

Colophon :—

इति श्रीविद्यापतिविरचिता माधवानलकथा समाप्ता ।

Post Colophon :—

शुभमस्तु । सं १८१० शा १६७५ श्रावण वदि बुधे पोखाग्रामे

काशीवासि-आत्मारामात्मज-जीवनरामेण लिखितं स्वार्थं परार्थं च ॥

यादृशमिति न्यायान्न मे दोषः ॥

It ends :—

ततो राज्ञा तयोर्विवाहः कारितो लोकास्तु हर्षिणो भूताः ।

5405.

1105. *Mādhavānala-Kāma-kandalā-kathā.*

Substance, country-made paper. 10½ × 4¾ inches. Folia, 10. Lines, 9-10 on a page. Extent in ślokas, 230. Character, Nāgara. Appearance, old. Complete.

For description see L. 82.

The love-story of Mādhavānala and Kama-kandalā. Mādhavānala, a handsome Brāhmaṇa lad of Puṣpavatī, fell in love with Kāma-kandalā, a dancing girl of Kāmavatī. They were united by Vikramāditya of Ujjayinī after many adventures.

5406.

ĀNANDA-DHARA.

10239. *Mādhavānala-Kāma-kandalā-kathā.*

Substance, country-made paper. 10¾ × 4¼ inches. A fragment. Folia, 5, marked 6, 7, 23, 24, 25. Lines, 9 on a page. Character, Nāgara. Date, Saṃvat 1764. Appearance, old and discoloured.

A different version of the same tale as the preceding number.

Colophon :—

इति कविवरानन्दधरेण विरचिता माधवानलकामकन्दलाकथा परिपूर्त्तिमगमत् ।

Post Colophon :—

संवत् १७६४ श्रावण सितपक्षद्वादश्यां बुधे लिखितमिदं श्रीदीक्षितलालमणिना देवाकलपुरे ॥

For Ānanda's version of the tale, see I.O. Catal. No. 4083, which, however, does not agree with the present MS. at least at the end.

It ends :—

भो राजन् परदुःखापहारक विक्रमार्क परशोकचिन्ताकर्त्तरीं विरुदावलीं वहसि। मम हृदये अतीव सौख्यं जातम्॥ ततो माधवः कामकन्दलया सहोज्जयिन्यां प्राप्तः॥

Along with this there are a sheet of paper containing Smṛtyartha-sārānukramaṇikā, and a leaf marked 26, containing stray verses.

5407.

10238. *Mādhavānala-Kāma-kandalā-kathā.*

Substance, country-made paper. 10 × 4 inches. Folia, 18, of which those marked 3 and 5–12 are missing. Character, Nāgara of the eighteenth century. Appearance, old and repaired. A fragment.

Colophon :—

इति माधवानलकामकन्दलासम्बन्धिनी नाटककथा समाप्ता।

A well-known love-story. See L. 724, I.O. Catal. No. 4081 and Oxf. Nos. 339, 340.

5408.

10240.

The last leaf of Mādhavānala-Kāma-kandalā in the same version as above.

Colophon :—

इति माधवानलकामकन्दला समाप्ता।

Post Colophon :—

संवत् १७८८।

5409.

5591. **वेतालपञ्चविंशतिः।** *Vetāla-pañca-viṃśatiḥ.*

In Śiva-dāsa's version.

Substance, palm-leaf. $12\frac{3}{4} \times 1\frac{1}{2}$ inches. Folia, 59. Lines, 5, 6 on a page. Extent in ślokas, 1,900. Character, Uḍiyā of the early nineteenth century. Appearance, good. But the first line of the first leaf is corroded.

Beginning :—

\+ \+ \+ \+

लोकानां हि विनोदाय करिष्येऽहं कथामिमाम् ॥

प्रारभ्यते न खलु विघ्नभयेन नीचैः

प्रारभ्य विघ्नलवकैर्विरमन्ति मध्याः ।

विघ्नैः सहस्रगुणितैरपि हन्यमानाः

प्रारब्धमुत्तमजना न परित्यजन्ति ॥

अस्ति दक्षिणापथे प्रतिष्ठानपुरं नाम नगरं। तत्र राजा गन्धर्व्वसेनो नाम। तस्य पुत्रो गान्धर्व्वसेनिः। स गान्धर्व्वसेनिर्म्मृगाणां व्यापादनाय दूरमाखेटकं गतः, मुनेर्वल्कलाश्रिनो दृष्टवानाश्रमम्। दृष्ट्वा च मनसि विचारितम्। मम जन्मनि बहुतरं पापं वर्त्तते। इदानीं मुनिः पापान्तको भविष्यति। तस्मात्तस्य दर्शनं कृत्वा गृहं गन्तव्यम्। इति विचार्य्य आश्रमान्तिकं जगाम। आश्रमे वसतः वल्कलाश्रिनो मुनेः वर्षशतानि व्यतीतानि। ब्रह्मलोकप्राप्तये पिचुमर्द्दतरोर्मूले स वल्कलाश्री मुनिर्ध्यानस्थितः तपः करोति निजाङ्गसौख्यं न वेत्ति। यथैव काष्ठं तथैव। तस्य तपोयोगान्मलमूत्रमपि न सम्भवति। निशीथे ध्यानादुत्थितः पिचुमर्द्दतरोर्वल्कलं कवलैकं भक्षयति। अनेन प्रकारेण तस्य मुनेर्वर्षशतानि व्यतीतानि। स राजा ध्यानस्थितं मुनिं दृष्ट्वा मनस्यचिन्तयत्। असौ यदा ध्यानं त्यजति तदास्य चरणयोः प्रणामं करिष्यामि।

End :—

इन्द्रेणोक्तमेवं भवतु। अपरं यदिच्छसि तद्भवतु। इन्द्रो वरं दत्त्वा स्वस्थानं गतः। विक्रमसेनो राजा अष्टौ सिद्धीर्लब्ध्वा स्वस्थानं जगाम।

प्राज्ञो वा यदि वा मुर्खो वृद्धो वा यदि वा शिशुः।

इमां यो वेत्ति सकलां स भवेद्विबुधोपमः ॥

Colophon :—

इति श्रीशिवदासविरचितायां वेतालपञ्चविंशतिकथायां पञ्च-
विंशतिकथकं समाप्तम्। इति समाप्तश्चायं ग्रन्थः।

See L. 126 and I.O. Catal. No. 4095.

5410.

2813. *Vetāla-pañca-viṃśatiḥ.*

Substance, country-made paper. 10×4½ inches. Folia, 50. Lines, 9 on a page. Character, Nāgara of the eighteenth century. Appearance, discoloured. Incomplete.

To the end of the 21st story.

5411.

8064. *Vetāla-pañca-viṃśatiḥ.*

Substance, palm-leaf. 12½ × 1¾ inches. Folia, 60, marked on one side with letter numerals and on the other with figures. Lines, 5 on a page. Character, Newari of the thirteenth century. Appearance, old and discoloured. Incomplete at the end.

The last colophon in the incomplete MS. in 56B :—

इति दशमो वेतालः।

5412.

889. *Vetāla-pañca-viṃśatiḥ.*

Substance, country-made paper. 11×5¾ inches. Folia, 60. Lines, 13 on a page. Extent in ślokas, 1,700. Character, Nāgara. Date, Saṃvat 1896. Appearance, old and repaired. Complete.

The well-known collection of 25 popular tales of a demon. It belongs to the recension attributed to Śiva-dāsa Bhaṭṭa.

L. 126 and I.O. Catal. 4093 are also stated to be of the same recension. But they do not quite agree, one with the other.

The text, as presented by this manuscript, agrees with L. 126 in the first story. But it has a special introduction relating to the origin of Vetāla, which is not to be found in L. 126. The ends also of the two do not agree.

The Post Colophon Statement:—

संवत् १८६६ चैत्र वदि अष्टम्यां ब्रहस्पतिवार पुस्तक वैताल-पञ्चविंशति समाप्तं ।

5413.

1118. सिंहासनद्वात्रिंशतिका ।

Siṃhāsana-dvātriṃśatikā.

Substance, country-made paper. 9¾ × 4½ inches. Folia, 65. Lines, 7, 8 on a page. Character, Nāgara. Appearance, old. Complete.

The well-known popular stories of the Jaina recension.

5414.

53. *Siṃhāsane dvātriṃśatī kathā.*

Substance, country-made paper. 9¾ × 4 inches. Folia, 73. Lines, 8 on a page. Extent in ślokas, 1,022. Character, Nāgara. Date, Saṃvat 1699. Appearance, old. Complete.

